प्रवपवदीधितिविद्योतः

१४३२

प० ४५

अनयवदीधितिनियोतः

१ श्रीगुरुगोविंद् ॐ सूर्य्यगणेशमहालक्ष्मीशिवविष्णायनमः॥ ॥ चिन्तामणिप्रकाशेन निरस्ततमसो मम। न्यायो गोकुलनाथस्य स्फुरत्ववयवेस्व
हा। अनुमितिर्द्विधा· स्वार्था परार्था च· स्वार्थत्वपरार्थत्वे पुनरनुमितित्वव्याप्ये जाती· तत्र स्वार्थानुमितिं प्रति जनकता परामर्शस्याप्रामाण्यशङ्का
कलङ्क· शून्यव्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वादिना पूर्वमुपपादिता· परार्थानुमितौ तु न तथाविधः परामर्शः कारणम्· नादिवाक्यप्रयोज्यपरा
मर्शधर्मिताप्रामाण्यशंकावतोऽपि वादिनो मध्यस्थस्य वा तथाविधानुमित्युदयात्· न च परामर्शसामान्यकारणतायामेव न्यायप्रयोज्यपरामर्श
विषयकाप्रामाण्यज्ञानजन्तीनामभावस्याप्रवेशादनुमितिसामान्यसामग्र्येव परार्थानुमितिरप्युपपद्यत इति वाच्यम्। तत्तत्परामर्शत्वावच्छिन्नविशे
ष्यकानामप्रामाण्यप्रकारकज्ञानानामनुगतरूपाभावेऽपि धूमज्ञानत्वावच्छेदेनाप्रामाण्यप्रकारकाणां धूमप्रकारतानिरूपकविशेष्यतात्वावच्छेदेन
धूमाभाववद्वृत्तित्वप्रकारकाणां धूमपरामर्शत्वावच्छेदेनाधिकरणप्रकारावच्छिन्नविशेष्यताकत्वावगाहिनां च ज्ञानानामनुगतरूपावच्छिन्नाभाव
स्यैव परामर्शसामान्यकारणतायां प्रवेशात्। तस्यापि न्यायदशायामप्रामाण्यज्ञाने न्यायप्रयोज्यपरामर्शात् परार्थानुमित्युत्पादात् स्वार्थपरार्थानुमित्योर्विभिन्न
सामग्रीप्रयोज्यजातिद्वयाभ्युपगमस्यावश्यकत्वात्· ननु तथापि धूमपरामर्शस्य धूमलिङ्गकानुमितिसामान्यं प्रत्येव जनकत्वं अप्रामाण्यशङ्का तु स्वा
र्थधूमलिङ्गकानुमितिप्रत्येव प्रतिबन्धिका· न तु परार्थानुमितिप्रत्यपि· न्यायप्रयोज्यपरार्थपरामर्शात्परार्थानुमितिरूपपद्यत इति चेन्न। एवमपि तन्नि
प्रात्यक्षिकादेव वह्निव्याप्यधूमवानयमिति आप्तवाक्यजनिते वा परामर्शे तस्याप्रामाण्यशङ्कायां स्वार्थानुमित्यनुत्पादेऽपि परार्थानुमित्युत्पादप्रसङ्गात्· अतो राम० १

मानसत्वावान्तरवैजात्यविशेषेणान्यायप्रयोज्यः परामर्शो विशिष्य परार्थानुमितौ कारणमप्रामाण्यशङ्काविरहो न कारणं ज्ञानत्वावच्छेद
क इत्यकामेनाप्युपेयम्। अन्यथानुपपत्तेः स च विजातीयः परामर्शो न तावदर्थोपस्थितिमात्रसहकृतेन मनसा केवलं जननीयः चक्षुरादि
नान्याय भिन्नेन शब्देन वोपस्थिते पुव्याप्तिपक्षधर्मताया लिङ्गे सुतथाविधपरामर्शोत्पत्तिप्रसङ्गात्। किन्तु वह्निव्याप्यधूमवान्पर्वत इत्याकारके विजातीय
परामर्शे पर्वतपक्षक वह्निसाध्यक धूमलिङ्गकन्यायेन सम्भूय जनितो महावाक्यार्थबोधस्तत्तेन जनकः यदाकुर्मिप्राः न्यायजन्यमहावाक्यार्थ
बोधस्य तादृशशाब्दज्ञानत्वेनैव जनकत्वं। वायुरूपप्रयोगजन्यज्ञाने एवोरूपपरामर्शसामग्रीत्वादस्य चार्थतो रूपवान्वह्निव्याप्यधूमवान्पमितिपरा
मर्शस्येवास्त्वोस्यादित्यादि। न्यायजन्यमहावाक्यार्थज्ञानेन विजातीयपरामर्शे जननीये समयवन्धविशेषज्ञानं सहकारीत्युपाध्यायाः व्याप्यादि इति
मिश्राः समयस्तु परामर्शस्यानुमितेर्वा प्रयोजकत्वस्वरूपो यादृशानुपूर्वीकवाक्यतावच्छेदेनावगतस्तादृशानुपूर्वीकवाक्यजनितो महावाक्यार्थबो
धस्तत्परामर्शजनकः। तथाहि प्रतिज्ञादिरूपदाहरणान्तो वाक्यकलापः परामर्शविशेषस्यानुमितिविशेषस्य वा प्रयोजक इति समये गृहीते प्राभाक
राणान्तथाविधवाक्येनैव उदाहरणोपनयावेव तथेति जानतां वात्स्यानां ताभ्यामेव विषयसंशयादयो दशवाक्यसन्दर्भः परार्थप्रयोजका इति नि
स्वयवतो जरन्नैयायिकादेस्तैरेव दशभिर्वाक्यैर्जनितो महावाक्यार्थबोधः परार्थपरामर्शप्रतिनियतरूपणोमणिन्यायेन जनकः तत्तद्दर्शनसमय
वन्धवशात्तत्तद्विन्यायएवपरानुपपत्त्यावयवकन्यायजनिता भगवदनुमितिरदृष्टद्वारा स्वात्मसाक्षात्कारस्योपकरोतीत्याकरानुसारिणः का

२ रूपपाङ्क्तिः रूपाणि निर्दिशन्ति — अत एव पक्षत्वसाध्यप्रश्नवाक्यादिक्रमेणोक्तिवाक्योत्पत्तिद्वारा श्रवणस्येव तथैव न्यायवाक्योत्पत्तिद्वारा मननस्यापि हेतुतेत्या-
ध्यत्वं मननस्य इति कृत्स्नं प्रतिपाद्यते । एवं स्थिते निरूपितानां व्याप्तिपक्षधर्मत्वादीनामेककार्यानुकूलत्वेन निरूपितपरामर्शस्य हेतुत्वेन वा सङ्गत्या न्यायं नि-
रूपयितुं निरुक्तसङ्गतिं सूचयन्निमूले । तच्चानुमानं परार्थं न्यायसाध्यमिति परार्थानुमानं परार्थानुमित्युपहितः परामर्शः न्यायसाध्यम् । न्यायजन्यम-
2 हावाक्यार्थबोधजन्यम् अथवा परार्थानुमानम् परार्थानुमितेः स्वव्यापारकं कारणं व्याप्तिमपि विषयीकुर्वन्महावाक्यार्थज्ञानं तथा च निरूपितानुमा-
नेजनकत्वमपि न्यायस्य सङ्गतिः । किं त्वनुमितिचरमेति स्वार्था परार्था चेति विभक्तयोरनुमित्योर्यच्चरमं परार्थानुमितिः तत्कारणं यो लिङ्गपरामर्शो
विजातीयव्याप्तिविशिष्टपक्षधर्मताज्ञानं तस्य प्रयोजकं यच्छाब्दज्ञानं तज्जनकं वा कं न्यायः पर्वतो वह्निव्याप्यो धूमो धूमवांश्चैतत् इति वाक्यजन्यवाक्यार्थ-
बोधात्मानसो वह्निव्याप्यधूमवानिति परामर्शस्ततः स्वार्थानुमितिस्तत्र सवाक्यवारणार्थं चरमेति । अनुमितिचरमकारणलिङ्गपरामर्शत्वेन चमा-
नसत्वव्याप्यो वैजात्यविशेष उपलक्ष्यते । अत्र च तज्जातीयं प्रतिप्रयोजकत्वं जनकत्वमेव प्रकृते विवक्षितं । न्यायजन्यमहावाक्यार्थज्ञानस्य साक्षादेव
तादृशपरामर्शकारणत्वात् । तेन चेत्यादिमूलग्रन्थेन न्यायजन्यमहावाक्यार्थज्ञाने न पक्षे व्याप्तिविशिष्टस्य हेतोर्वैशिष्ट्यावगाहिनी यामितिस्त-
स्याः कारणजनकं मनउपस्थापयतेस्वात्मसहकारित्वं पक्षे क्रियत इत्युपाध्यायाः । प्रयोजकत्वं स्वव्यापारककारणत्वं न्यायजन्यमहावाक्यार्थज्ञाने न्यायविशे- राम.
षोऽनुमितिविशेषस्य प्रयोजक इति स्मरणामुद्बोधकविधया जन्यते । तदेव स्मरणं व्यापारमासाद्य महावाक्यार्थधीः परामर्शविशेषमुत्पादयतीति तेन चे २

त्वादिमूलकस्तु न्यायत्वविशिष्टेऽनुमितिप्रयोजकत्ववैशिष्ट्यावगाहिमानान्तरमनुभवान्यज्ञानमुत्थाप्यते जन्यतेऽर्थ इति मिश्राः। पुत्रयते चैतत्।
अत एव समयबन्धवाक्येऽतिव्याप्तिवारणार्थं शाब्दत्वमपि ज्ञाने विशेषणमर्थवत्। अन्यथा समयबन्धवाक्यजन्यः शाब्दबोधः पञ्चावयववाक्य
मनुमितिविशेषप्रयोजकमित्याकाङ्क्षासमानाकारस्मारणद्वारा पदार्थपरामर्शप्रयोजक इति तज्जनकवाक्येऽतिप्रसङ्गात्। शाब्दपदोपसन्दानेन च
शाब्दबोधत्वेन प्रयोजकता लभ्यते। समयबन्धस्य हस्तुप्रत्यक्षादिसाधारणानुभवत्वादिना प्रयोजको न तु शाब्दबुद्धित्वेन तद्वक्रमालोके न च शाब्दपदद
नेष्ये [illegible] पदोपः शाब्दज्ञानत्वेन तादृशप्रयोजकत्वस्य विवक्षितत्वात्। न च योग्यताज्ञानं तथा। योग्यताज्ञानत्वेन जनकत्वादिति अत्र योग्यतापदं स
मयपरं निरसवधेयम्। अयोपाध्यायमतेऽपि यत्र समयबन्धवाक्यस्य पञ्चावयववाक्यस्य चैकं समूहालम्बनात्मकं स्मरणं मध्यमन्यायार्थपञ्चावयववाक्य
त्वावच्छेदेनानुमितिप्रयोजकत्वावगाही समूहालम्बनात्मकः शाब्दबोधः ततः पदार्थपरामर्शस्तत्र समयबन्धवाक्येऽतिव्याप्तिवारणाय शाब्दपदम्।
आनुपूर्वीविशेषलाभाय च वाक्यपदम्। तथा च यादृशानुपूर्वीकवाक्यजन्यवाक्यार्थबुद्धित्वेन पदार्थपरामर्शप्रतिजनकत्वं तादृशानुपूर्वीमत्त्वं न्याय
पदप्रवृत्तिनिमित्तं लभ्यते। अवश्यं चेदमन्यथाऽपि विवक्षणीयमिति चेत् तदा भवतु प्रयोजकपदं जनकार्थकमस्तु च समयज्ञानं सहकारी न तु सा पाः
द्वंद्वं च सर्वदर्शनसाधारणं न्यायमात्मा मात्यलक्षणम् विशुद्धयोर्वा न्यवयवयोः पर्याप्तानुपूर्वीकस्यापि वाक्यस्य तत्र समयबन्धसहकारेण पदार्थपरामर्श
प्रयोजकत्वात्। अत एव तत्त्वविवेकादौ यत्सतत्तच्छास्त्रिकं तत्त्वविचाराधीनमिति शब्दादिरिति द्वयवयवेनेन न्यायेन कथा द्वयपतेः। नन्वेवं पञ्चतेऽ

त्म

ग्निर्धूमोयतो धूमश्चवा व्हिमन्मात्रवृत्ति रस्तिचधूमेपर्वतवृत्तित्वंतस्मादग्निः पर्वतवृत्तिरितिवाक्ये ऽतिव्याप्तिरालोककादेर्द्रावितो विरुध्यते· तस्या
२ श्चया आनुपूर्व्याः समयविशेषग्रह सहकारेणापरार्थपरामर्शप्रयोजकतया तादृशावाक्यस्य न्यायत्वसंभवादितिचेन्न: सर्वदर्शनसम्प्रदायवि
रुद्धानुपूर्वीकवाक्यजन्यवाक्यार्थग्रहस्यपरार्थपरामर्शप्रयोजकत्वस्यैतादृशानुपूर्वीकंवाक्यमनुमितिप्रयोजकमितिसमयग्रहसहकारिता
३ याश्चप्रमाणाभावप्रतिहतत्वात्· आन्वीक्षादर्शनेन्यायपदपरिभाषाप्रवृत्तिनिमित्तंतु सूत्रकारमुनितत्समयग्रहसहकारेणायादृशानुपूर्वीक
वाक्यजन्यवाक्यार्थबुद्धित्वावच्छिन्नंपरार्थपरामर्शंजनयतितादृशानुपूर्वीमत्त्वंतेनरूपेणोद्दिष्टस्येवन्यायस्याऽवयवाः प्रतिज्ञादिवाक्येविम
र्शाः इति नन्यूनत्वमाधिक्यंयेतिदिक्। नव्यास्तु देदं लक्षणं यदि परार्थपरामर्शप्रतिपर्वतोवह्निमानित्यादिवाक्यपञ्चकघटितानुपूर्वीविशिष्टवा
क्यजन्यशाब्दबोधत्वेनकारणत्वंस्यात्तत्र तथा पृथिवीद्रव्यंगुणादित्यादिन्यायप्रयोज्यपरामर्शेव्यभिचारात् पर्वतोवह्निमानित्यादिन्यायजन्यवा
क्यार्थज्ञानाद्व्याप्यत्वव्याप्यपृथिवीत्ववानयमभावव्याप्यधूमवानयंवह्निव्याप्यधूमवत्त्वमहानसमित्यादिपरामर्शोत्पत्तिसङ्ग्रहात् हेत्वादिघटिता
त्वन्तस्यप्रतिज्ञावाक्यमात्रेणुत्तरत्वस्यन्यायेनजनितेप्रतिज्ञार्थमात्रविषयकेबोधेतुल्यत्वायत्नेऽपिप्रकारान्तरेणान्यस्याप्युपनयस्याभावाच्च· नचानुपू
र्वीपर्याप्त्यधिकरणजन्यत्वंविवक्षितमुत्तरत्वपूर्वत्वस्वरूपानुपूर्व्याः प्रत्येकवर्णापर्याप्तत्वात्· न्यायवर्णसमुदायत्वेनमहावाक्यार्थबोधेप्यजनकत्वा राम०
त्· वर्णानामक्रमेणात्वाच्च· अथवायद्वह्निव्याप्यधूमवान्पर्वतइत्याकारकपरार्थपरामर्शत्वावच्छिन्नंतद्दिष्टोऽवयवाप्रतिपर्वतोवह्निमानित्यादिवाक्यपञ्च २

कघटितानुपूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यताधिकरणशाब्दबुद्धित्वेन कारणता। प्रतिज्ञार्थमात्रविषयकः शाब्दबोधस्तु न तादृशानु
पूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपितकार्यत्वविशिष्ट इति चेन्न। वन्ह्यादिपदे घटवाचकत्वभ्रमवतोऽपि वह्निपरामर्शोत्पत्तिप्रसङ्गात्। यदि च प
क्षे वन्ह्यादिसंसर्गावगाहित्वमपि वाक्यार्थबोधे विशेषणम्। तथापि यत्र न्यायस्य न्यायभिन्नवाक्यस्य च समूहालम्बनी न्यायान्तर्गतवन्ह्यादिपदे च वन्ह्य
वाचकत्वादिभ्रमः न्यायाभिन्नवाक्यशब्दाच्च वह्निमत्पर्वतादिहेतुकत्वादिविषयको घटादिपरामर्शजनको वाक्यार्थबोधस्तत्र वह्निव्याप्यवत्तापरामर्शो
त्पत्तिप्रसङ्गः। अथ वह्निव्याप्यधूमवान्पर्वत इति परार्थपरामर्शत्वन्न्यायविशेषत्वं वा जन्यतावच्छेदकं पर्वतो वह्निमान् धूमादित्यादिवाक्यपञ्चकघटिता
नुपूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपिता धूमज्ञानजन्यज्ञानविषयवह्निमत्पर्वतादिविशिष्टार्थावगाहिवाक्यार्थबुद्धितावच्छिन्नाया जन्यतातत्कालिनि
र्णायकत्वेन च कारणत्वं न्यायभिन्नवाक्यजन्यन्यायार्थावगाहिवाक्यार्थबोधत्वावच्छेदेन न्यायघटितानुपूर्वीज्ञानत्वेन कारणत्वमतस्तदुदास इति चेन्नः
न्यायजन्यवाक्यार्थबोधेऽपि वाक्यपञ्चकपर्याप्तानुपूर्वीज्ञानत्वेन कारणत्वाभावात्। प्रकृतिप्रत्यययोरानुपूर्वीज्ञानस्यैव तद्रूपेण कारणत्वम्। विभक्त्य
न्तानामानुपूर्वीज्ञानं पुनरन्यथासिद्धमित्यभ्युपगमात्। अथ पर्वतपदोत्तरवहितविसर्गस्य वह्निमानित्यानुपूर्व्या धूमादित्यानुपूर्व्याश्चाविशेषेऽपि धूमात्प
र्वतो वह्निमानिति वाक्याद्धूमज्ञानव्याप्यवह्नित्वावच्छिन्नविधेयतानिरूपितपर्वतत्वावच्छिन्नोद्देश्यताकान्वयबुद्धेरनुत्पत्त्या निरुक्तानुद्धो पर्वतो वह्निमा
न्धूमादित्यानुपूर्वीज्ञानत्वेन कारणत्वमावश्यकमिति चेत्। अस्त्वेवमपि प्रतिज्ञाहेतुभ्यामुपनयनिगमनाभ्यां सम्भूय वाक्यार्थद्वयम्। उदाहरणे च स्वरू

४ वाक्यार्थेन संप्रतिपाद्यत इति पञ्चानामानुपूर्वी पञ्चकमेव प्रत्येकं धूमज्ञानज्ञाप्यवह्निमान् पर्वत इति यो धूमवानिति धूमवान् धूमव्यापकवह्निमानि
5 ति महानसं धूमवद्धूमव्यापकवह्निमदिति वह्निव्याप्यधूमवदिति वह्निव्याप्यधूमवदिति वह्निव्याप्यधूमवान् पर्वतो निरुक्तरूपो यपपन्नधूमज्ञानेज्ञा
प्यवह्निमानिति वाक्यार्थपञ्चके कारण — नुप्रतिज्ञापञ्चके पर्याप्तानुपूर्वी तावत्कुत्रचिदिति तादृशानुपूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपितका
र्यताधिकरणत्वाद्बुद्धेः प्रसिद्धा तद्घटितलक्षणमसंभवीति शाब्दार्थसमाधत्ते प्रतिज्ञादिपञ्चेति पर्वतो वह्निमान् धूमादिति यो यो धूमवानिति स व
ह्निमानिति यथा महानस इति तथा पर्वतस्तथा तस्मात् वह्निमानिति पञ्चवाक्यानि परस्परान्वयवन्ति तानि स्वस्वार्थबोधकानि तेरेकवाक्यतापापरस्पर
सहकारेण निरुक्तैः पञ्चभिः स्वार्थविषयतया विशिष्टज्ञानं समूहालम्बनात्मकं शाब्दबोधो जन्यते तेन मानान्तरमनुमित्युपहितायाः पक्षे व्या
प्तिविशिष्टवैशिष्ट्यावगाहिन्या मितेः परार्थपरामर्शस्य कारणाम् मनउत्पाद्यते कार्यप्रवणं क्रियते तेन मनसा चरमपरामर्शः चरमगाणि तानुमि
तिजनको विलक्षणपरामर्श उत्पाद्यते तथा च पर्वतो वह्निव्याप्यधूमवानिति परार्थपरामर्शे पर्वतो वह्निमान् धूमादित्यसत्यानुपूर्वीज्ञानत्वावच्छिन्नकार
णतानिरूपिततापाधूमज्ञानज्ञाप्यवह्निमत्पर्वतविषयतावच्छिन्नायाः कार्यतायाः श्चैव विधाश्च न तत्सोऽपराः कार्यताः तावत्कार्यतापञ्चकविशिष्टप
त्पर्वत इत्यादितस्माद्वह्निमानित्यन्तमहावाक्यपर्याप्तानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकं शाब्दज्ञानं तत्त्वेनैव तत्कारणमिति महानुपूर्वीज्ञानस्यान्यथा राम०
सिद्धत्वेऽपि न क्षतिः यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकशाब्दबुद्धित्वेन परामर्शत्वावच्छिन्नं प्रतिजनकत्वं तादृशाऽऽनुपूर्वीमत्त्वं न्यायत्वमपि न दुर्वचं ज ४

नकपदस्याव्यवहितपूर्वपरत्वादिति भावः । न्यायजन्यस्य न्यायजन्यमहानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिकस्य परामर्शप्रतिपयोजकताजनकतासाच
साक्षात्स्वव्यापारिकावेसन्पदेतत् · आन्वीक्षानयप्रसिद्धस्य न्यायस्यावयवान्लक्षयति अनुमितीति · परार्थपरामर्शमात्रसूत्रकारसंप्रतिपन्नस्समय
यहस्सहकारेणाजनकं यावद्महावाक्यार्थसमूहालम्बनज्ञानं प्रथमशाब्दज्ञानमित्यस्यार्थः यदाहुः अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशा
ब्दज्ञानत्वेन न्यायजन्यज्ञानस्य विवक्षितत्वादिति मिश्राः । तज्जनकं · तदव्यवहितपूर्ववर्त्ति यत्शाब्दं शाब्दविषयकं ज्ञानं · यादृशानुपूर्वीज्ञानाव्यवहितोत्त
रोत्पत्तिकशाब्दज्ञानत्वेनानुमितिचरमकारणलिङ्गपरामर्शजनकत्वं · तादृश्याः पञ्चावयवघटितानुपूर्व्या ज्ञानमितियावत् तज्जनकं तद्विषयिताव्या
पकविषयिताकं · तेन न्यायानुपूर्वीघटकानुपूर्वीकत्वं लभ्यते · तदेव च न्यायान्तर्गतत्वं · तावन्मात्रं प्रतिज्ञैकदेशो प्रतिज्ञाहेतुसमुदायादौ संपूर्णाव्या
येचगतमितिवाक्यमुपात्तम् · तच्च प्रतिज्ञादिपरिभाषाप्रवृत्तिनिमित्तान्यतमानुपूर्वीमत्त्वं · एतेन यादे प्रथमशाब्दज्ञानानेन न्यायजन्यो महावाक्यार्थबो
धोयस्य तज्जनकमवान्तरवाक्यार्थज्ञानमुद्दयापर्वतादौ वह्निमदभेदाद्यवगाहिशाब्दज्ञानं तज्जनकवाक्यत्वमित्यवयवलक्षणमभिप्रेतम् · तदा प्रति
ज्ञाद्यवयवैः प्रत्येकं जनितानामवान्तरवाक्यार्थबोधानां चिरविनष्टत्वात्पुनरपि न्यायघटकपदानामनुसन्धानम् · ततः खलेकपोतन्यायेन महावाक्या
र्थबोधस्तेनाहत्यैव परामर्शो जन्यत इत्यसम्भवः । अथ खलेकपोतन्यायेन बोधादनन्तरितो विशिष्टवैशिष्ट्यावगाहीशाब्दबोधो जन्यते । स एव परामर्श
हेतुः । अत एव तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्थाप्यत इति स्वारसतः सङ्गच्छते · तथा च तथाविधपरार्थपरामर्शजनकज्ञाने वर्त्तते या विशि

५ एवैशिष्ट्यविषयतातद्विशिष्टज्ञानत्वावच्छिन्नेयाद्दशाशाद्बुद्धित्वेनजनकत्वं·तदवच्छिन्नकारणीभूतज्ञानविषयीभूतानुपूर्वीमत्त्वमवयवत्व
लक्षणमितिचेन्न नीलपर्वतः। कस्तूरीप्रभववह्निमान्नीलधूमादित्यादौप्रतिज्ञाहेत्वेकदेशेऽतिव्याप्तेः। प्रतिज्ञोदाहरणयोरर्थस्यान्यत्रानन्वया
5 त्तयोरप्राप्तेश्चमहावाक्यार्थबोधानुप्रविष्टायेवाक्यार्थास्तेषांप्रत्येकबोधकत्वंतुहेतूपनययोः। प्रतिज्ञानिगमनयोश्चाप्यासमस्तिप्राप्तस्त्वनिपू
दाहरणावयवेषुःनहियोयोधूमवान्सवह्निमानित्यनयोर्वाक्ययोरेकोविशिष्टवाक्यार्थः। यत्रच दघटितवाक्याभासेकमुख्यविशेष्यताकबो
धाजनकतात्· अन्यथायंपर्वतोऽग्निमानित्यादौप्रणामर्थपत्कात मोदनंभुंक्तइत्यादौयोग्यतत्वप्रसङ्गः। इत्यादिसमादितम्। याद्दशानुपूर्वीकवाक्यत्वा
वच्छेदेनप्रतिज्ञात्वादिव्यवहारः। तादृशीयायानुपूर्वीघटिकानुपूर्वीतद्वत्वंतात्पर्यात्· मतङ्गःजोनीलइत्यादौगजोनीलइत्यानुपूर्वीवारणाय
प्रतिज्ञात्वादिव्यवहारयोग्यचरमानुपूर्वीघटकत्वमपिविशेषणांवक्ष्यतेः·नन्वनुमितिजनकवाक्यार्थज्ञानजनकवाक्यन्यायः। तद्घटकंवाक्यमवयव
इत्येवनिरुच्यतामस्तुचन्यायेनशाब्दज्ञानितएवपरामर्शः। परार्थानुमितिहेतुरतआह अतएवेति तदवयवेनवह्निव्याप्येत्यादिना·जननादिति
जननम्उत्पादनम्घटनमव्यवहितस्ययथातत्त्वमनन्वयइतिबोध्यम्· अथस्वार्थत्वंपरार्थत्वञ्चनानुमितित्वव्याप्यजातीकिंतुस्वादृशयोत्पन्नानुमि
तिः। परार्थानुमितिन्यायोपजनुमितिप्रयोजकंवाक्यं·तच्चसमयबन्धविशेषवशात्त्वंदार्शनिकानांद्व्यवयवंत्र्यवयवंपञ्चावयवमित्यादिक्रमेणव्य ए.म.०
वस्थितम्·अप्राप्तेन्तिनुवह्निव्याप्यधूमवानित्यादिवाक्यंसर्वतन्त्राविरुद्धोन्यायइत्यभिसन्धानस्यक्रमस्यचिन्त्यतमुत्थापयति यत्विसादिसंक्षेपतो ५

अनुमितिविशेषस्याप्रवेशात् परामर्शोऽनुमितिजनकं ज्ञानम्। ननु परामर्शप्रयोजकवाक्यत्वं कथाघटकन्यायमात्रे प्रयुज्यमानस्य न्यायपदस्य प्र
वृत्तिनिमित्तम् उत स्वपरिभाषितस्य· आद्ये· कथायामिति· आकाङ्क्षा· समयबन्धस्तथा च यादृशानुपूर्वीकवाक्यत्वावच्छेदेन समयः शास्त्रे निबद्धः तद्वि
शिष्ट एव वाक्ये न्यायपदप्रयोगात्· वह्निव्याप्यधूमवानिति वाक्ये च समयबन्धाभावान्न तादृशवाक्यं शास्त्रीयन्यायव्यवहारविषयः इति भावः द्वितीये ला
ह अन्यथेति समयमुल्लङ्घ्य परिभाषणे इत्यर्थः तथा च लाघवाद्वाक्यत्वमपि त्यक्त्वा परामर्शजनकमात्रे न्यायपदं परिभाष्यतामिति भावः अथ न्या
यजन्यशाब्दबोधादौ वैजात्यस्वीकारः परामर्शादिवैजात्योपपादकतया न्यायावयवलक्षणनिर्वचनान्यथानुपपत्त्या वा सिध्यति· आद्ये· परार्थानु
मितित्वं जातिरनुभवसामग्रीवैचित्र्याद्धा सिद्धानपक्षसाध्यलिङ्गव्याप्तिभेदाद्द्विधा ते जलपृथिव्यौ रसवत्त्वे गुरुत्वादिति न्यायप्रयोज्यानुमितौ ज
लपक्षकपृथिवीपक्षकानुमितित्वयोः साङ्कर्यप्रसङ्गात्· चित्रानुमितिस्वीकारे जात्यादिबाहुल्यस्यानुमितिद्वयस्वीकारे ज्ञानयौगपद्यस्य चापत्ते
ः किन्तु सकलपरार्थानुमितिसाधारणैकैव· तथा च पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकविजातीयानुमितौ तथाविध एव परामर्शो निश्चयत्व
स्य न्यायप्रयोज्यत्वस्य चाप्रवेशेन लाघवात् ज्ञानत्वस्थाने वैजात्यविशेषप्रवेशपक्षेणाभ्युपेयते· तादृशपरामर्शे च न्यायजन्यो महावाक्यार्थबो
धो न वैजात्यमात्रेण च जनकः घटसाध्यकन्यायवाक्यार्थबोधाद्वह्निसाध्यकपरार्थपरामर्शप्रसङ्गः· किन्तु वह्निमदभिन्नपर्वतादिस्वरूपवाक्यार्थप्रत्य
क्षानुग्राहि विजातीयत्वेन· तथा च शाब्दत्वमेव कुतो न प्रवेशनीयमलं वैजात्येन शाब्दत्वप्रवेशेनापि निश्चयत्वाप्रवेशलाघवसम्भवात्· ननु तथा

विपर्ययतोऽग्निधूमोऽयं तद्देशादिन्यायमित्रवाक्यजन्यतावच्छेदकार्थबोधेन पदार्थपरामर्शजननात् । न्यायनियतानुपूर्वीविशेषज्ञानप्रयोज्यत्वमपि
तावच्छेदकार्थबोधे प्रवेशनीयम् । तदप्रवेशे लाघवाद् एव ज्ञातत्वप्रवेशाद् एव बोधितः । विजातीयशाब्दबोधे च न्यायनियतानुपूर्वीज्ञानस्य पृथक्कारण
त्वमभ्युपेयम् । परामर्शप्रतिकारणतायां गृहीतधर्मस्यावच्छेदकत्वे तद्घटकानां विशेष्यविशेषणभावस्य व्यत्यासेन गृहीतत्वस्य कारणतावच्छेदकप्रस
ङ्गात् इति चेन्न । यत्र घटसाध्यकन्यायस्य वह्निसाध्यकन्यायाभासस्य समूहालम्बनस्मरणम् अथ न्यायतदाभासयोः हेतोर्वा कार्थस्य विजाती
यशाब्दबोधः तत्र घटस्येव वह्नेरपि पदार्थपरामर्शप्रसङ्गे न्यायनियतानुपूर्वीप्रयोज्यत्वप्रवेशस्य अपव्याप्याव्यापकत्वात् । वह्निसाध्यकन्याया
र्थगोचरो विजातीयः शाब्दबोधो वह्निसाध्यकन्यायनियतानुपूर्वीज्ञानजन्यतया तदभावे कथम् उत्पद्यताम् इति चेत् । मास्तु विजातीयः शाब्दः सामान्य
तु स्यादेव सामग्रीसत्त्वात् । विजातीयशाब्दबोधसामग्र्या तदितरप्रतिबन्धकतायाम् अतिप्रसङ्गो एवम् यदि चानया रीत्या परामर्शवैजात्यम् अपि न सिद्ध
ति । नासैतीज । यादृशानुपूर्वीज्ञानाभावविशिष्टो न तो सति कन्यायार्थशाब्दबोधजनितपरामर्शत्वेन पदार्थानुमितिजनकत्वं तादृशानुपूर्वीमत्त्वं
न्यायत्वम् एवं तल्लक्षणं निर्वाच्यम् इति दिक् । यद्वा वह्निसाध्यकपदार्थपरामर्शे न्यायार्थविषयकविजातीयशाब्दबोधस्य कारणतायाम् एकस्मिन्नेव प
क्षे नानावाक्यार्थविषयकतानां प्रवेशोपगच्छमुविशेषणविशेष्यभावव्यत्यासेन विशेषाधिकप्रसङ्गः एवं कार्यकारणभावस्य गौरवात् वह्निमत्सर्वताद्य
केकवाक्यार्थविषयकविजातीयशाब्दबोधः कार्यसहभावेन कारणमेवाभेकं पुनरर्थसिद्धं न्यायनियतानुपूर्वीज्ञानमपि पूर्ववर्तितया परामर्श

प्रत्येव जनकं पदत्र च स्वार्थबोधएवम्मायानान्तरवत्कस्मात्न्यायनियतानुपूर्वीविषयकत्वात्तत्रापि पदार्थः परामर्श इष्यत एवेति मतम्। तत्रापि विशेषेजा
त्येन तत्स्मानेयाद्बोधत्वप्रवेशोनैवाभितनिवीहात्। यादृशानुपूर्वीज्ञानत्वेन पदार्थपरामर्शजनकत्वं तादृशाकांक्षायइति लक्षणत्रापि सुवच
त्वाच्च। अन्त्येत्वाह तत्रज्ञानविशेषेइत्यादिः एवमुपपद्यमानमूलं पदार्थत्वमनुमितित्वव्याप्यजातिरितितावदप्रामाणिकम्। साक्षादनुभवाद्व्याप्य
वहारादृष्टाकारणत्वेचित्राहासिद्धेत। नाद्योऽनुभवासिद्धेः। नद्वितीयः पदार्थानुमितिरितिव्यवहारस्यान्यथाप्युपपन्नानुमितित्वावलंबनत्वात्। नतृती
यः सत्तामप्रामाणप्रकारांपदार्थानुमितेः प्यनभ्युपगमात्। अभ्युपगमे वान्यापजन्यशाब्दार्थज्ञानविरहविशिष्टप्रामाणपत्तानस्यानुमिति
सामान्यं प्रत्येव प्रतिबन्धकताभ्युपगमे नन्यापजन्यवाक्यार्थबोधानन्तरिताप्रामाण्यावगाहिनोऽपि परामर्शादनुमित्युत्पादसम्भवात्। अनुमिति
परामर्शयोर्वैजात्यद्वयस्य कार्यकारणभावान्तरस्य विजातीयपरामर्शव्यापजशाब्दबोधविशेषस्य जनकतायाश्च कल्पनमपेक्ष्य लघुप्रामाणपज्ञा
नप्रतिबन्धकतायां शाब्दबोधविशेषस्योत्तेजकत्वस्वीकारस्यैव लघीयस्त्वात्। भवतु वा पदार्थत्वं जातिस्तथापि तद्विशिष्टेकारणान्तरकल्पनाऽनुपप
कृत्वेन्यापजन्यो वाक्यार्थबोधस्तादृश्येणवैजात्यविशेषेणवाकारणमस्तु किमनन्तरामानस्य परामर्शाङ्गीकारेण। स्यादेतत् पदस्यापि पदार्थानुबद्धे। नजाय
मानायीनिगमनार्थबुद्धावेवसाजातिस्तत्रापि पक्षधर्मताज्ञानप्रभवत्वयोगेणोमननपदव्यपदेशः। ज्ञानस्य पदार्थपरामर्शप्रयोज्यजातेरपि मनन
नत्वव्याप्यत्वे प्रमाणाभावात्। गौरण एवसः। अथासिद्धसाधनस्थली यन्यायास्य पदार्थमननस्याङ्गत्वात्तत्राप्यनुमितित्वव्याप्यजातिसिद्धिरन्यथापक्षता

१७ कारणतानतिरेकत्वेन प्रसङ्गादिति चेन्न· न स्वार्थानुमितिर्जीयमानमितानुमित्सासत्वसत्तिचाप्रामाण्यापज्ञानानास्कन्दितेसिद्धिस्वरूपेन्यायप्रयोगेऽप्येमानस
परामर्शे वा परार्थानुमित्सापरार्थानुमितौ स्वार्थानुमितित्वान्न वह्निमतो दृष्टपताकानुमित्साविरहविशिष्टसिद्ध्यभावस्वरूपायाः पक्षतायाः का
रणतानतिरेकत्वेनावच्छेदकत्वेन लाघवानवकाशात्· अनुमितित्वप्रकारकेच्छानुस्वार्थानुमितिं प्रति सिद्धेः प्रतिबन्धकतायामेवोत्तेजिकान परार्था
नुमितिः· उत्तेजकत्वेपि वा नानुमितित्वस्य परार्थमननवृत्तिधर्मप्रकारकेच्छायाः उत्तेजितस्यानिबन्धकत्वम्· साधयतिफलबलेन तदवृत्तित्वोत्तेजक
त्वे सति विरहादिसादिदूषणयोरनुपपन्नमिव मन्तव्यथाऽऽक्तनस्य पलक्षणवृक्ष्यमाणदोषदुष्टतया च त्वयं न्यायलक्षणमाह दीधितौ उचितानुपूर्वी
केति पर्वतो वह्निमानित्यादयस्तस्मात् वह्निमानित्यादिना व्यावर्त्यन्यायपदेन पर्वतो वह्निमानित्यादिवाक्यस्य घटकाः पकाररेफवकारादयः प्रतिज्ञापदे
न धूमादित्यस्य त्वत्र धूकाररेफकारवकारादयः हेतुपदेनेत्येवं यथायथं प्रतिपाद्यन्ते तत्र तस्माद्वह्निमानित्यत्र नकारे न्यायत्वमवयवत्वं निगमनत्वञ्च
पर्वतो वह्निमानित्यत्र पकाररेफकारे च प्रतिज्ञात्वमवयवत्वं न्यायत्वञ्च न्यायादिपदप्रवृत्तिनिमित्तमपूर्वोत्तरत्वमध्यत्वस्वरूपानुपूर्वीविशेषस्य प्रत्येकवर्णेष्वेव
विश्रान्तेः तथा चैकत्र वर्णे न्यायपदं प्रतिज्ञादिपदञ्च प्रवर्त्तेत तत्र न्यायपदप्रवृत्तिनिमित्तानामानुपूर्वीणामुपलक्षणविधयापरिचयार्थोयमारम्भः अथवा
तावद्वर्णवृत्तिरन्यतमत्वादिरनुगतो धर्मो न्यायादिपदप्रवृत्तिनिमित्तमस्त्वेव वाक्ये न्यायपदं न मानार्थं किन्तु मिलितएव वाक्ये तथा च तावदन्यतमत्वानामपरिचा राम०
यकोऽयमुद्यमः तथा च प्रथमकल्पे प्रतिज्ञादिपञ्चकसमुदायपदात्मिकायाः उचितानुपूर्वीतद्वद्वाक्यं न्याय इत्यर्थः उचितत्वं· कथाघटकवर्णवृत्तित्वं· नायमा

भासइति कश्चित्कोद्धारवाक्यानुपूर्व्यपि कथाघटकवर्णावृत्तिरिति तत्समुदायस्य प्रतिज्ञादिपञ्चकसमुदायात्मकत्वमानुपूर्वीविशेषणम्· प्रतिज्ञादिपञ्च
कान्यावृत्तिरिति तदर्थः प्रतिज्ञापञ्चकान्यावृत्तिकथारम्भकवर्णावृत्तिर्या आनुपूर्वी सा प्रतिज्ञादिस्वरूपापि संभवति तदव्यावृत्तये वाक्यत्वमुपात्तम्· यावत्तः
प्रतिज्ञात्वादिविशिष्टवर्णास्तद्वृत्तिजातयो वा तद्घटितत्वस्वरूपं लक्षणं तथानुपूर्वीविशेषणम् वाक्यपदेन प्रतिज्ञात्वाद्यानुपूर्वीपञ्चकघटितत्वमवधीयत
इति तत्त्वम् एवं सति न्यायकुतार्किकोद्धारोभयघटितानुपूर्वीवारणाय प्रतिज्ञाद्यानुपूर्वीपञ्चकानधिकरणवर्णाघटितपदम्· प्रतिज्ञादिपञ्चकसमुदायपद
म्· उचितपदानुपूर्वतो वह्निमानुरागात्पौष· पृथिवीत्वान्नसदृश्यान् रूपवाप्यगम्यवानयन्नत्मा तस्मात्तावानित्यादिविभिन्नपक्षकसाध्यहेतुकेन सुक्त
मोक्तेन वा प्रतिज्ञादिपञ्चकेन घटितायाः पर्वतो वह्निमान् धूमात् तस्मादित्यादिसंघटनाय विरुद्धायाः भिन्नपुरुषोच्चरितक्रमिकवर्णसमूहहेतोः सिद्धसाधन
स्थलीयन्यायाभासवृत्तेश्चानुपूर्व्या वुदासाय असाधकतासाधकन्यायन्यायपदेनानर्थतत्रसमयबंधवशाद्वच्यवत्तुष्टयघटितायास्तत्संचकघटितायाश्चा
नुपूर्व्या न्यायपदप्रवृत्तिनिमित्तत्वात् न हीदं न्यायस्य लक्षणमिति भ्रमितव्यं म चतुर्वाच्यायस्वरूपवर्णानां लक्षणपरमिदं वचनं तथापि असाधकतासाध
कन्यायोऽपि पंचावयवक एव हेत्वाभासात्मकहेतोरसाधकतासाधकत्वात् तस्योभयवादिसिद्धत्वेपि वादिना कथासमयवशादुदाहरणमप्रयोज्यमिति मद्भाचा
र्याणामभिप्रायः एवं च प्रतिज्ञाद्यानुपूर्वीपंचकघटितानामाप्रतिज्ञाद्यानुपूर्वीपंचकानधिकरणवर्णाघटिता कथाघटकवर्णावृत्तिरानुपूर्वी तद्वान्न्वर्णो
न्यायइति निगर्वः।। ।।द्वितीयकल्पेतु उचितानुपूर्वीकाः कथाघटकाः प्रतिज्ञात्वादीनां पंचानां प्रत्येकमधिकरणायेव वर्णास्तेषां समुदायोन्यतमो वा न्या

८ पदस्यार्थः भिन्नसाध्यहेतुकादिन्यायाभासवारणाय कथायामेकोद्देश इति कं टकोद्धारवारणाय प्रतिज्ञादिपंचकेति तावद्वर्णानामनुगमाय समुदाय इति ननु
8 वक्ष्यमाणन्यायावयवकत्वगर्भप्रतिज्ञात्वादिप्रवेशे न्यायत्वप्रतिज्ञात्वयोरन्योन्याश्रय इत्यत आह प्रतिज्ञात्वादिकमिति यादृशानुपूर्वीविशेषावच्छेदेन
प्रामाणिकानां प्रतिज्ञादिव्यवहारः तादृशानुपूर्वीपंचघटितत्वादिकमेव प्रवेशनीयमिति भावः ननु तथाप्ययं नाभास इति कंटकोद्धारवाक्यमादाय न्यायन्या
यघटितानुपूर्वीकथाघटकमात्रवृत्तिः प्रतिज्ञाद्यानुपूर्वीमात्रघटितत्वं चेतितन्निमित्तकन्यायपदप्रवृत्तिप्रसंगः अयं नाभास इत्यानुपूर्व्या अपि प्रतिज्ञादि
व्यवहारप्रयोजकत्वादत आह साध्यादीति तथा च यादृशानुपूर्वीविशेषावच्छेदेन वह्निपर्वतधूमसाध्यपक्षहेतुकप्रतिज्ञादिव्यवहारस्तादृशानु
पूर्व्यनधिकरणवर्णाघटितत्वं प्रवेशनीयं अयं नाभास इत्यानुपूर्वीविशेषावच्छेदेनाभासत्वाभावसाध्यकप्रतिज्ञाव्यवहारसत्वेपि वन्ह्यादिसाध्य
कप्रतिज्ञाव्यवहाराभावात् तद्घटितानुपूर्वी न न्यायपदप्रवृत्तिनिमित्तमिति भावः नन्वेवं हेतुसाध्यपक्षभेदेन न्यायपदप्रवृत्तिनिमित्तभेदात् न्या
यपदं नानार्थकं स्यादित्याशंकां तदिष्टमेवेत्याह व्याख्यादेरिति आदिपदाद्वाक्यादेर्न्यायपदादेरननुगमः अननुगतप्रवृत्तिनिमित्तकत्वं उपल
क्षणमिदं एकसाध्यहेतुकपक्षकन्यायेष्वानुपूर्वीभेदात् न्यायपदप्रवृत्तिर्भिद्यत एव न्यायपदेन हि गिरिरग्निमान्धूमादिपर्वतो वह्निमान्धूमादिशै
लोऽग्निमाञ्छ्वासनीत्यादिवाक्यानि तत्तदानुपूर्वीविशेषविशिष्टानि प्रत्याय्यंते ननु सकलानुपूर्वीसाधारणकोऽप्यनुगतोऽनतिप्रसक्तो धर्मो विद्यते न्या०
विद्यमानोपि न न्यायपदजन्यप्रतीतिपथमवतरतीति पदशक्त्यालोके प्रपंचितमस्माभिः॥ ॥गौडास्तु उचितानुपूर्वीकेति औचित्यं युक्त ८

मोक्षप्रतिज्ञादिपंचकावृत्तित्वं आनुपूर्वीवर्णानां वाक्यानां वा यो वा पर्य्यं उक्तमोक्षप्रतिज्ञादिपंचकमिन्नेति निर्गलितार्थः तावन्मात्रं घटमान
येति वाक्येपि गतयतः प्रतिज्ञादीति न्यायावयववारणाय पंचकेति समुदायपदं तु तादृशपंचकत्वपर्य्याप्त्यधिकरणतापन्नप्रपदवृत्तिनि
भिन्नत्वस्य तदितरभेदसाधनत्वस्य वा लाभाय तथा च स्वोक्तमोक्षप्रतिज्ञादिपंचकंभिन्नं यत् प्रतिज्ञादि तत्पर्याप्तपंचकत्वं न्यायत्वमिति समु
दायार्थः शब्दमिति यादृशयादृशानुपूर्वीविशेषावच्छेदेन प्रतिज्ञादिव्यवहारस्तावन्मात्रमित्यर्थः नीन्यो न्यायाश्रयपदस्य पलक्षणं न्यायांतर्ग
तत्वगर्भप्रतिज्ञात्वादेः प्रवेशे स्वोक्तमोक्षप्रतिज्ञादेः न्यायांतर्गतत्वविरहात् तत्समुदायातिव्याप्तिविरहादुचितानुपूर्वीकपदं व्यर्थमपि भवती
ति ध्येयं भिन्नपक्षसाध्यकप्रतिज्ञादिसमुदायेऽतिव्याप्तेराह साध्यादीति तथा च यादृशयादृशानुपूर्व्यवच्छेदेन प्रामाणिकानां तत्तत्पक्षसाध्यहेतु
कप्रतिज्ञादिव्यवहारस्तादृशान्यतमानुपूर्वीकत्वमत्र प्रतिज्ञात्वादिकं निर्वाच्यं पर्वतः प्रमावान् वह्नेर्यो यो दहनवान् स द्युतिमान् रूचिव्याप्यकृ
ताशनवान् गिरिस्तस्मात् द्युतिमान् इत्यादि भिन्नपर्यायोक्तप्रतिज्ञादिसमुदायो न्यायत्वेनेष्ट इति भावः नन्वेवमुचितानुपूर्वीकवह्निसाध्यक
पर्वतपक्षकधूमहेतुकप्रतिज्ञादिपंचकसमुदायत्वस्य न्यायलक्षणत्वे साध्यपक्षहेत्वंतरकन्यायेष्वव्याप्तेरत आह साध्यादेरिति तथा च
यादृशसमुदायत्वावच्छेदेन पर्वतपक्षवह्निसाध्यकधूमलिंगकानुमितिता सर्वेणाप्युपमानत्वं प्रामाणिकानां तादृशान्यपव्यवहारविवि
षयत्वं वा तादृशसमुदायत्वमेव पक्षतावच्छेदकमिति लक्षणानुगमो न दोष इत्याचक्षते तच्चिंत्यं नत्वनुमितिचरमकारणस्य लिंग

९ पदार्थस्यप्रयोजकत्वंवाक्यार्थविशेषत्वोपलक्षकं अतएवप्रतिज्ञादिपंचवाक्यैरेकवाक्यतयास्वार्थविशिष्टज्ञानंजन्यतइत्यनेनतदुप
पादितं तादृशवाक्यार्थबोधजनकवाक्यत्वंयथाश्रुतमूलार्थः कथंपरिष्क्रियतइतिचेत् स वाक्यार्थबोधः किमेकमुख्यविशेष्यताकोनाना
१ मुख्यविशेष्यताकोवा आद्येप्रतिज्ञानिगमनयोरिति निगमनपदमुपनयस्याप्युपलक्षकं तथाचवह्निमान्पर्वतः प्रतिज्ञार्थउपनयार्थो
विशिष्टधूमवान्पर्वतः तयोर्नभेदेनान्वयः प्रातिपदिकार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् नाप्यभेदेननिरवच्छिन्नपर्वतत्वप्रकारतानिरूपि
तविशेष्यताप्रतियोगिन्यास्तादात्म्यसंसर्गावच्छिन्नायाःप्रकारतायानिरवच्छिन्नावच्छेदकतासंसर्गेणाशाब्दबोधेपर्वतत्वस्यतादात्म्येनप्रतिबंध
कत्वात् अन्यथापर्वतःपर्वतइत्यादिवाक्यादपिशाब्दबोधप्रसंगात् अथप्रतिज्ञोपनयाभ्यांपर्वतोवह्निमान्वह्निव्याप्यधूमवानितिपर्वतत्व
मेकदैवोल्लिखन्ननुभवोजन्यतांएकत्ववाचकयोःसुवाप्योःतयोःसंभेदेप्येकत्वेकत्वावगाहनवत् पर्वतवाचकाभ्यामिदंपर्वतयदाभ्यांपर्वतत्वा
पितथैवावगाहनसंभवात् भवतुवाप्रकृतेपर्वतत्वनिष्ठप्रकारतावच्छेदकतासामानाधिकरण्येनधूमत्वावच्छिन्नानतुनिरवच्छिन्ना तद्धर्मवि
शिष्टविशेषणवत्तानिर्णीतस्यसामानाधिकरण्यसंबंधेनतद्धर्मावच्छिन्नतद्धर्मनिष्ठावच्छेदकताकविशिष्टवैशिष्ट्यबोधजनकत्वस्याभावा
त् संसर्गभेदेनाविशिष्टवैशिष्ट्यबोधेविशेषणतावच्छेदकप्रकारकज्ञानकारणताभेदात् भवतुचापर्वतत्वावच्छिन्नविशेष्यतानिरूपिततादा एम०
त्म्यसंबंधावच्छिन्नप्रकारतानिरूपकंपरवच्छेदकतावदन्यदवच्छेदकत्वंतदेवपर्वतत्वमेदजन्यतावच्छेदकःसंबंधःअवच्छेदकतावत्त्वंचस्वनि ९

रूपकत्वस्वनिरूपकप्रकारतानिरूपकत्वान्यतरसंसर्गेण स्वं च तत्त्वविशिष्टं तथा च प्रतिज्ञार्थविशेष्यकोपनयार्थप्रकारकवाक्यार्थबोधाभ्युपगम
मे पि पर्वतत्वनिष्ठप्रकारतावच्छेदकतात्वनिरूपकप्रकारतानिरूपकत्वसंसर्गेण धूमनिष्ठावच्छेदकतावतीमवतीति पर्वतत्वेन न प्रतिबध्यते ए
वं हेतुप्रकृतप्रतिज्ञया धूमज्ञानज्ञाप्यवह्निमत्पर्वत उपनयसहकृतेन निगमनेन वह्निव्याप्यधूमवान् व्याप्तिपक्षधर्मताविशिष्टधूमज्ञानज्ञाप्य
वह्निमान् पर्वत उपस्थापितस्तयोस्तादात्म्येनान्वयोपि संभवतीति । दृष्टान्तवाचकदृष्टान्तवाक्यमिति बोधस्यापि मे वाभ्युपेयमानत्वादत आह उदाहर
णावयवांतरयोरप्येति इदमुपलक्षणं उदाहरणाद्यटकवाक्यार्थेन्वयस्यापि परस्परमनन्वयो दृष्टव्यः यद्यपि धूमवत्पदार्थयोः धूमव्यापकवह्निम
न्महानसस्मृतधूमवत्त्वतादात्म्येन प्रतिज्ञार्थेन्वेतुमर्हत्येव । चैत्रो जानाति पाककृतेः यो यः पचति स जानाति यथा मैत्रः ज्ञानाश्रयत्वव्याप्यपाक
कृतिमानयं तस्माज्जानातीत्यादावाद्यनार्थविशिष्टबुद्धिरूपे तत्पदार्थस्यान्वयासंभवे पि युगपदुपस्थितानां सर्वपदार्थानां खलेकपोतन्या
यात् पाककृतिव्याप्यज्ञानाश्रयत्ववान् पाककृतिमदभिन्नो मैत्रसदृशो न पाककृतिव्यापकज्ञानाश्रयत्ववत्पाककृतिमतावाभिन्नो ज्ञानाश्रयत्वव्या
प्यपाककृतिमता व्याप्तिपक्षधर्मताविशिष्टपाककृतिव्याप्यज्ञानाश्रयताकेन चैत्रेणाभिन्नश्चैत्र इत्यन्वयबोधः यथा मैत्र इत्यादौ यथा सादृश्यार्थ उपमा
नस्य विशेषणत्वेनैवान्वयस्याभ्युपगन्तव्यत्वात् इवशब्दार्थवत् तदुक्तं काव्यप्रकाशे यथेववादिशब्दाः यत्परास्तस्यैवोपमानताप्रतीतिरिति । तथापि यथा
महानसमिति वाक्ये यथापदप्रयोगमृष्टधूमतद्व्यापकवह्निमत्तया महानसं बोधयति न तु यथापदार्थविशेषणतया तद्वाक्यार्थस्य धूमादिमन्महानस

१० 10 स्य मेदेनासदेनवा नान्यत्रान्वयो भवितुमर्हतीति नैकमुख्यविशेष्यताकबोधजनकोन्वयः अन्यथा यथा महानसं तथा पर्वत इत्यादौ महानस
वृत्तिधर्मवान् पर्वत इति यथा पदेनैव बोधितेन तथा यदानर्थकं प्रसंगात् सिद्धान्ते तु यथाशब्दोपात्तो धूमादिरेव तथाशब्देन परामृश्यत इति धूमवन्म
हानसं धूमवान् पर्वत इत्यन्वयबोधः स्यात् पदः पत्तदोरेकधर्मावच्छिन्नपरामर्शकत्वस्वाभाव्यात् यथाप्रवेशो मनित्साभिसंबन्धस्य व्युत्पत्तिसिद्धत्वात् य
थाशब्दस्य यच्छब्दविकारत्वात् उदाहरणवाक्ये तु न तथाशब्दानुप्रवेशः यच्छब्दोत्तरवाक्यगतत्वेन पूर्ववाक्ये तच्छब्दानुपादानस्य प्रकाशकादिसिद्धं
वक्तव्यापितत्वात् न चैवं यथैव वाग्याद्यार्थस्वरसात्तस्यैव बोधमानता प्रतीतिरिति पक्षाशविरोधः उत्रोपमानत्वं हि नवाधारणधर्मविशेषत्वस्वरूपं
तत्तुल्यमस्येत्यादौ साधर्म्यविशेषे उपमानतावभासनात् किंतु प्रकृष्टगुणत्वादि तच्च व्यंजनासहकृततयाभिधयाइवादिशब्दैः प्रतिपाद्यत इत्यालंका
रिकाणां दर्शनएवशोभते यदि च यथा महानसं तथा पर्वत इत्यादावपि यदा शब्दोपात्तो धूमादौ महानसंविशेषणतामेव तथा च यो धर्मो महानस
वृत्तिः स धर्मः पर्वतवृत्तिरित्यन्वयबोधः यत्र चोत्तरवाक्यगतो यथाशब्दः स उपमानविशेष्यगतं स्वार्थं पूर्ववाक्यार्थगतोपमेयविशेषणतयैव भा
सयति इवशब्दवत् अत एव वाग्रुद्गावह इति वजेत्यादि यथा वज्रेरोऽवबैलादौ तुल्यमेवोपमानोपमेयपदयोः समानविभक्तिकत्वं श्रूयत इति मन रा.म. १०
माश्रीयते यदि वा यथाशब्दार्थोपमानयोर्विशेष्यविशेषणभावे कामचार इत्यभ्युपेयते तथापि हृदो निर्धूमो निर्वह्नित्वात् यो यो धूमवान् स वह्निमा
न् यथा पर्वत इत्यत्र व्यतिरेकोदाहरणस्य न प्रतिज्ञावाक्ये वाक्यत्वं किंच यत्तदोरेकधर्मावच्छिन्नपरामर्शितो रेकमुख्यविशेष्यताकवाक्यार्थबुद्धि

प्रसक्तसमर्थत्वात् योयोधूमवान् स वह्निमानिति सत्त्वयोरेकदा कालासंभवः अन्यथापर्यवसानात् मुख्यत्वादेरपि अन्वयबोधप्रसंगात् येनयोविनास्त
मभिद्युत्पत्तीत्यादौ चेत्रइत्यनुषक्तस्य हूयो वीक्यपोरनुप्रवेशादाकांक्षासमर्थनमित्याशयः एकविशेष्ये निषेधस्य विशेषांतरे अनुज्ञाफलकत्वा
त् पर्यवसितेति कथंचिदुपन्यस्थायं पदस्य निगमनेऽनुषंगाभावे विशिष्टैकार्थप्रतिपत्तिरनुमितिस्तस्यास्तातत् प्रयोजकत्वेन तात्पर्यं नन्वभावभू
देकमुख्यविशेष्यताको बोधः मुख्यविशेष्यतापंचकविशिष्टवाक्यार्थबोधस्यानुमितिजनकपदार्थपदार्थस्य प्रयोजकत्वेनानुगमात्तज्जनकवाक्य
त्वं न्यायलक्षणं संभवतीति द्वितीयकल्पे स्यादित्यत आह तादृशेत्यादि परामर्शप्रतियोजकत्वं परामर्शविषयेतरविषयकज्ञानत्वेन वा तद्वि
षयविषयकत्वमात्रेणवा विवक्षितमात्रे यदीति तत्तत्पदार्थसार्थस्यापि पक्षधर्मते तदुपस्थापकतया उदाहरणं दृष्टांतविनाभूतं उदाहरणो
पनययोस्तन्मात्रजनितत्वाकार्थबोधस्य तथा च न्यायजनितो वाक्यार्थबोधो न तथेत्यसंभव इति भावः द्वितीयेत्वाह अथेति तदानुकूल्य तद्विष
यविषयकत्वं तथात्वं परामर्शविषयविषयकवाक्यार्थबोधप्रयोजकत्वं तथा चावेवचाकोऽतिव्याप्तिरिति भावः समाहितं अनुमितिचरमेत्या
दि मूलस्यो चितानुपूर्वीकप्रतिज्ञादिपंचकसमुदायेतात्पर्यं यवर्णनेन स्वयमवयवलक्षणमाह अवयवत्वं त्वित्यादि तत्सक्त तत्साध्यकतल्लिं
गकन्यायावयवस्य लक्षणं तादृशन्यायसामान्यपदविषयकप्रतीतिविषयत्वं द्विर्व्यत्प्रतिज्ञादिव्यवहारनिमित्तं समुदायत्वं पर्याप्तानसंचकान्यत
मत्वं पर्वतो वह्निमानित्यादौ सीनवाक्यवारणाय सत्यंतं गिरिर्वह्निमानित्यादिव्यावर्तनाय पर्वतो वह्निमानित्यादिसमुदायत्वाविषयकप्रतीतिविषय

११ त्वेपि पर्वतः पक्षक वह्निसाध्यक धूमलिंगक न्यायसामान्यं न तथा समस्तन्यायपर्याप्तसमुदायत्वादेर्व्याप्यप्रतिज्ञादीति पंचकवत्त्वं न कुत्रापीत्य
तमेति ननु मंतृ गजो नीलः इत्यादिन्यायांतर्गतस्य गजो नील इत्यादिवाक्यस्य न्यायांतर्गतप्रतिज्ञात्वव्यवहारः निर्भिन्नसमुदायत्ववत्तान्तरात्रा नित्याप्तिर
तो लक्षणांतरमाह प्रतिज्ञाघटेति न्यायांतर्गतत्वे सति स्वत्रानुषंजनीयं अत्र तु तत्तन्न्यायऽनुपूर्वीभेदात् अवयवलक्षणां भिद्यते तथा च न्यायपर्या
प्ततदानुपूर्वीघटकत्वे सतीत्यर्थः प्रतिज्ञाघटकत्वमपि तन्न्यायानुपूर्व्यंतर्गतप्रतिज्ञाघटकत्वमेव घटकत्वं तु तद्भिन्नत्वे सति तद्विषयतान्यापकवि
षयताकत्वं तेन प्रतिज्ञात्वादेर्न प्रतिज्ञात्वघटकत्वं प्रतिज्ञादिहेत्वंतराभाग इत्याशेनाह उभयेति अत्र प्रथमघटकत्वं न भेदगर्भं उभयपदार्थविशिष्य
निर्वक्ति उभयंचेत्यादि॥ ॥अत्रेदमवधेयं प्रतिज्ञादिपंचकसमुदायत्वं पदिन्याय त्वं तदाद्यवयवकं वाक्यं न्याय इति चोद्देशः सह विवादः कथं पदमादध्या
तन हि द्व्यवयवकं वाक्यं पंचावयवसमुदाय इति वोद्धाप्यपदिशन्निव्याहततत्वादग्रे च प्रतिज्ञानसाधनांगमित्यादिकाशंका कथमवतरेत् साधनां
गत्वे नन्याय्यावयवत्वस्यैव तत्र निषेधात् न च प्रतिज्ञाप्रतिज्ञाद्यन्यतमेत्याशंकि तु शंक्यते नापि नन्यायांतर्गतेतिव्याघातात् तथा च यतस्मन् तत्तद्दृ
शीकं संशयविवाक्यासितं शब्दादिदिव्यदाहरणोपनयमात्रात्मकं वाक्यं न्यायो न वेति विप्रतिपत्तिविषयन्यायत्वस्वरूपनिर्वचनप्रस्तावे किमनेनानै
पाधिकमात्राभिमतन्यायधर्मिनिर्वचनेन ततो यादृशानुपूर्वीकवाक्यप्रयोज्यवाक्यार्थबुद्धित्वेन परार्थपरामर्शप्रयोजकत्वं तादृशानुपूर्वीकवा एम
क्यत्वं सर्वदर्शनसाधारणं लक्षणमवश्यं निर्वाच्यं यस्य द्व्यवयवकवाक्यत्वावच्छेदेन विवादः प्रतिज्ञानसाधनांगमित्यादिकाशंका तु तादृशापूर्वीय ११

एकत्वस्वरूपमवयवगतद्वयवस्थाधारतां न्यायांतर्यतत्वमात्रमालंबते सोऽलमवयवलक्षणानैयायिकपरिभाषितावयवमात्रमालंबते अतएव
पंचधा तद्विभागो विप्रतिज्ञावाक्ये संगच्छते। यदपि यंवर्धिद्वयवैरेकैकवाक्यतया बोधो न संभवतीत्युपपादितं तदपि चिंत्यं द्विधा ह्येकवाक्यता पदै
कवाक्यता वाक्यैकवाक्यता च तत्र पदैकवाक्यत्वं प्रतिज्ञाहेत्वोरुपनयनिगमनयोरेव न तूदाहरणेन कस्यापि तथा वाक्यैकवाक्यत्वं पंचानामव
यवानां संभवत्येव अत्र एवप्रतिज्ञादिपंचवाक्यैरेकवाक्यतयाप्यार्थविशिष्टज्ञानं जन्यत इति मूले वाक्यैकवाक्यतैवोक्ता ननु पदैकवाक्यता वाक्यो
रेकवाक्यतायां च न पदयोरिव समानविभक्तिकत्वं प्रसंततत्वादितं त्रे किंतु संगतिमात्रमतएव मूले पत्यवयवमनेकवाक्यतायै संगतयः प्रदर्शि
ताः अतएव दर्शपौर्णमासाभ्यां स्वर्गकामो यजेतेति प्रधानविधिना यागेन स्वर्गं भावयेदिति वगतायां भावनायां कथमित्याकांक्षायां उपपादक
त्वसंगत्या प्रवृत्त इडोपजतीत्यभिधो यजंतीत्यादिविधावबगतस्य प्रयाजस्योपयागोपपादकभावेनान्वयः यथा संगत्या पदयोर्वाक्ययोः पौर्वापर्ये
ण प्रवृत्तिस्तदर्थयोस्तेनैव संसर्गेणान्वयोऽवगमात् अतएव वमलिनं ते वपुरिति सिद्धार्थे निर्दिष्टे किं ततः इति साध्यत्वसंगत्याऽभिहिते सरसिस्ना
याइति वाक्ये साध्यतयैव वपुर्मालिन्यस्यान्वयः अतएव तत्पदस्थे स्थले किमित्याकांक्षायामुक्ते मृगो धावतीति वाक्ये विवक्षितया मृगकर्तृकधा
वनस्य दर्शनेन्वयः अतएव यस्य मृगो धावतीत्यादावेकवाक्यताम्यपुहाः शाब्दविधावतामतएव तिउ· तिङि· ति सूत्रे णातिउ· तालर्दंतिउ·
तं निहन्यत इत्यर्थके ताति उ· इति तिउ· न शाब्दः पर्युदस्तः अन्यथा अग्निमीले पुरोहितमित्यत्रेलेशाब्देसुवंतात्परेयथा निघातो नाम सर्वानुदा

१२ तःस्वरस्तथाधावतिपश्येत्यत्रयपपश्याद्व्स्यापिप्रसङ्गेन·तत्रचदर्शनधावनयोःपरस्परमनन्वयेसामर्थ्याभावादेवनिघातस्याप्रसक्तौसोत्रम
तिउ·इतिपदमनर्थकमापद्येतइतिक्रिययोरपि·परस्परमन्वयोवाक्यैकवाक्यतयावश्यमभ्युपेतव्यःपदसंबंधिनोविधेःसामर्थ्यमात्राश्रितत्वे
12 नपूर्वपदव्यपेक्षारहितेनिघातादिविधिर्नप्रवर्तेतइतितद्दिदोमंत्रणीयात्तथाचप्रकृतेप्रतिज्ञाहेत्वोःपदैकवाक्यतेवअतएवमूलेसाध्य
निर्देशानंतरंकुतइत्याकांक्षायांसाधनत्वाभिव्यंजकविभक्तिमल्लिंगवचनमेवोचितमित्यनेनविभक्त्यादिनिर्देशात्कवाक्यतेवसूच्यतेवा
क्यैकवाक्यतयासाधनत्वेनान्वयेमलिनंवपुःस्यादित्यादौसाधनत्वाभिव्यंजकविभक्तेरनुपयोगात्हेतुनाचधूमस्यगमकत्वेप्रदर्शिते
कथमस्यगमकत्वमित्याकांक्षायामुपपादकत्वसंगत्याभिहितेउदाहरणेतदर्थस्यानेरूपपाद्योपपादकभावसंसर्गेणगमकत्वेन्वयअ
तएवहेतावुक्तेकथमस्यगमकत्वमित्याकांक्षायामित्यादिमूलेनहेतूदाहरणयोरूपोक्तःसूचयिष्यउदाहरणावयववाक्ययोरपिवाक्यैकवा
क्यतयान्वयादेवधूमवान्धूमव्यापकवह्निमानित्यर्थलाभात्यत्तच्छब्दयोरुभयोरपिमहानसत्वेनमहानसस्यपर्वतत्वेनपर्वतादेश्चैकैव
लंबोधकतयातच्छब्देनधूमवत्तोनुपस्थापनाद्यो यो धूमवानितिवाक्येनमहानसंधूमवत्पर्वतोधूमवानित्यादिकमुपस्थितंसवह्निमानित्यनेना
पिमहानसंवह्निमत्पर्वतोवह्निमानित्युपस्थितंततोयत्तदर्थपरिहारेणवाक्यैकवाक्यतयेधूमवान्धूमव्यापकवह्निमानित्यन्वयबोधःयच्छब्दद्वि ग म०
र्वचनार्थव्यापकतायास्तत्रैवबोधेऽनुप्रवेशात्अतएवयच्छब्दप्रयोगोव्युदेश्यपनाव्यंजकमध्येपरिगणितःततःतत्सदार्थस्योद्देश्यत्वेनतत्पदोपस्थितत्वं १२

प्राथम्यं चानियामकमिति वाच्यं प्राधान्यात् । तस्मात् धूमवदुद्देश्यकमहावाक्यार्थबोधे यद्यद्घटितवाक्यजन्या धूमविधेयकोपस्थितिः कारणमिति नाकै
कवाक्यतयोद्देश्यविधेयभावव्याप्यकमिति स्य यसी यते दृष्टान्तार्थोपि वह्निमतिविशेषणतयैवान्वेति एवमुदाहरणार्थनुपनयार्थस्य द्वावप्युपपाद्योप
पादकभावे महेत्वर्थगमकत्वेऽन्विताः अत एव व्याप्तिपक्षधर्मतयोरुभयोरप्युपदर्शनप्राप्तेर्व्याप्तेः प्राथम्यादित्यादिनामूले हेतूपनयोरप्युपपादक
त्वसङ्गतिः सूचयिष्यते यद्यपि तु नरूदाहरणार्थोपनयार्थयोरन्वयाभिनिवेशः तदा भवतु व्याप्तिरित्यादिना मूले न सहकारित्वेनान्वयः सूचयिष्य
ते उपनयनिगमनयोस्तु पदैकवाक्यतेवेति वाक्यैकवाक्यतया पंचानामवयवानामेकविशिष्टार्थबोधकत्वं मूलोक्तं नानुपपन्नमिति दिक् ॥ ॥
सांप्रदायिकानामेव सकलदर्शनसाधारणमवयवलक्षणं व्याचष्टे कारणमत आह प्रतिज्ञादिभिः पंचभिः प्रतिपाद्यावह्निमत्पर्वतधूमीयहेतु हीति प्रतिज्ञा
त्वादयो विशिष्टार्थास्तेषां ज्ञानपंचकं विषयतापंचकं तेषामन्यतमेन रूपेणावच्छिन्नं शाब्दबोधं प्रतिजनकवाक्यत्वमित्यर्थः एतन्मते पर्वतो वह्निमा
नितानुपूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपिततया वह्निमत्पर्वतावगाहिशाब्दत्वावच्छिन्नाजन्यतायाश्च धूमादिस्यानुपूर्वीज्ञानत्वावच्छिन्नकारणतानि
रूपिता धूमीयहेतुतेन्वयबोधत्वावच्छिन्नाकार्यतायाश्चापर्याप्तिस्तत्तया विधाकार्यतात्वादृशपंचकविशिष्टस्य न्यायमहानुपूर्वीज्ञानाव्यवहितोत्त
रोत्पत्तिकस्य शाब्दबोधस्य तादृश्येण वह्निव्याप्यधूमवान्पर्वत इति परार्थपरामर्शप्रतिकारणत्वं अथवा महानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्तिक
स्य शाब्दबोधस्य महानुपूर्वीज्ञातस्य वा शाब्दबोधद्वारा कारणत्वमेकं पर्वतो वह्निमानित्यानुपूर्वीज्ञानत्वावच्छिन्नकारणतानिरूपितवह्निमत्पर्वत

विषयताकशाब्दबोधत्वावच्छिन्नकार्यताविशिष्टशाब्दबोधादेः पंचकार्यसहभावेन कारणतेषामैक्यमर्थसिद्धं तथा च यादृशानुपूर्वीज्ञानत्वावच्छि
१२ न्नकारणतानिरूपितकार्यतावत्त्वेन परामर्शजनकत्वं तादृशानुपूर्वीमत्त्वे सति न्यायघटकत्वमित्यवयवत्वमित्यस्य रहस्यतात्पर्याभ्यामर्थः केचिदिति अ
13 वयवानां रूपस्य तथात्वसंभवेपि उदाहरणवाक्यार्थस्यैक्याभावे न उदाहरणवाक्यानुपूर्वीज्ञानत्वेन तत्कारणत्वासंभवादव्याप्तिः प्रतिज्ञाहेतूभयानु
पनयनिगमनाभ्यां संभूयैकार्थबोधने तद्विषयत्वेनैव परामर्शजनने हेतुत्वं ते उपनयादौ च भागेऽतिव्याप्तिर्मलंगजो नीलइत्यत्र च गजो नीलइतिभागे
ऽतिव्याप्तितादवस्थ्यमित्यादिरस्वरसः सूचितः मूलेज्ञानविशेषेति निर्वचनान्यथानुपपत्त्या न जातिसिद्धिस्तदभिव्यंजकधर्मान्तरावश्यकत्वे तत एवा
नुगतव्यवहारोपपत्तेरितिभावः तदेवोक्तं मयपतिदीधितौ तथा चेत्ति तादृशजातौ न्यायप्रतिज्ञादिप्रयोज्यजातौ मूलेन्यथेति यदि निर्वचनान्यथानुपप
त्त्या तत्स्थापचे नवा जातिसिद्धिस्वीकारश्चावश्यकः तदा पृथिवीजलोभयनिर्वचनादेका जलतेजोलक्षणनिर्वचनादपरा जातिः सिध्येदिति जाति
संकरप्रसंगइत्यर्थः पदार्थानुमितिपरामर्शत्वेतु न निर्वचनलाघवात्सिद्धे किंतु कारणत्वेजात्यादेवेति भावः दीधितिकारस्तु प्रतिज्ञादिप्रयोज्यजा
तीनां संकरप्रसंगपरतया मूलं योजयति बाधकमित्यादिना प्रमाणमिति अननुगतजाते निर्वचनस्यानुपपादकत्वादितिभावः मिश्रमतमाह रा॰म॰
केचित्विति उदस्यत्वमत्वरसः यथाश्रुतमनूद्य दूषितमपि सूत्रं स्वयं परिष्कुरुते साध्येत्यादि विशिष्टइति तदुद्देश्यकेत्यर्थः वैशिष्टेति नहि १२
धेयकेत्यर्थः तथा च पक्षतावच्छेदकावच्छिन्नोद्देश्यतानिरूपिताया साध्यतावच्छेदकधर्मसंसर्गोभयावच्छिन्नाविधेयतातद्द्वाकार्थबुद्धिजनक

त्वेसतिप्रायावत्त्वमर्थः पर्वतो वह्निमानिति प्रतिज्ञावाक्याच्च पर्वतमुद्दिश्य वह्निर्विधीयते न तु वह्निमान् अन्यद्विप्रकारविशेष्यत्वादिसम्भवे
वचविधेयोद्देश्यत्वं अत एव गुणानां गुणत्वमिति वाको गुणामुद्दिश्य गुणत्वं विधीयत इति वर्द्धमानोपाध्यायाः मत्वर्थस्तु पदार्थतया प्रकारभूतो
विधेयतावच्छेदकसंसर्गीभूयापि भासते अत एव विषयतया ज्ञाने साध्ये समवायेन हेतौ तस्मिन्नुपनये मातिव्याप्तिः उपनये ज्ञानविधेयतायाः सा
ध्यतावच्छेदकसंबंधानवच्छेद्यत्वात् प्रतिसाधयितव्याचनन्यायप्रयोगः ये न वह्निसाध्यकतद्धेतुकन्यायोपनयेऽतिव्याप्तिः स्यात् पक्षतावच्छेदकावच्छे
देन तत्सामानाधिकरण्येन च न्यायो द्विधा तत्र सर्गमपि द्विविधं तत्र प्रथमे पक्षतावच्छेदेन तादृशसाध्यकत्वमेव प्रवेशनीयमत एव पर्वतत्वावच्छेदे
न साध्यसिद्धेरुद्देश्यतायां तत्सामानाधिकरण्येन पर्वतस्य दृष्टांततामभ्युपगमेपि नोदाहरणेऽतिव्याप्तिः पक्षतावच्छेदकविशिष्टेइत्यस्य फलमाह उदा
हरणश्चेति साध्यतावच्छेदकेत्यादेः फलमाह उपनयाश्चेति वस्तुतः प्रतिज्ञात्वसहकारेणावयवांतरस्यापि तादृशबोधजनकत्वात् साध्यतावच्छेदकावच्छि
न्नविधेयतानिरूपितपक्षतावच्छेदकावच्छिन्नोद्देश्यताशालिशाब्दबोधत्वावच्छिन्नकार्यतानिरूपितकारणताया ज्ञानत्वेनावच्छिद्यते तादृशावयवता
वच्छेदकानुपूर्वीमत्वं सूत्रार्थोऽवश्यमभ्युपेतव्य इति साध्यतावच्छेदकावच्छेदकपक्षतावच्छेदकयोरप्रवेशेऽसंभव एवेत्यादत्तो दूषणमुपात्तमित्यवधेयम् मू
ले किं तदुद्देश्येति अत्रेवंविधानुमितावियं प्रतिज्ञेति प्रामाणिकव्यवहारगोचरवाक्यत्वं लक्ष्यतावच्छेदकं अथवा तादृशवाक्यार्थनिर्वचनपरमिदं त
त्राप्युद्देश्यानुमितिपदद्वयं कंठोक्तं तु वादइतरत्सामर्थ्यनिर्वचनं उद्देश्यानुमितिः पर्वतो वह्निमानित्यादिः परार्थानुमितिस्तद्धेतुर्यो लिंगपरामर्शः

१४ 14 तत्सप्रयोजकं जनकं यद्वाक्यार्थज्ञानं तज्जनकत्वेन तदव्यवहितपूर्ववर्त्तिज्ञानविषयानुपूर्वीमत्त्वे सतीत्यर्थः यादृशानुपूर्वीज्ञानाव्यवहितोत्तरोत्पत्ति
कवाक्यार्थज्ञानत्वेन तादृशपरामर्शजनकत्वं तादृशानुपूर्वीमत्त्वे सतीति यावत् आनुपूर्वी तु तादृशोत्तरत्वरूपा चरमवर्णमात्रे तादृशपूर्वत्व
रूपा प्रथमवर्णमात्रे कतिपयवर्णपूर्वोत्तरत्वद्वयघटितमध्यमत्वरूपा मध्यवर्णमात्रे विश्राम्यतीति सर्वे न्यायघटकावर्णास्तादृशानुपूर्वीम
न्तस्तेन न्यायत्वे सतीति फलितार्थः न्यायत्वं समुदायत्वं आसक्रमिसेकदेशिनामभिमानमात्रं उद्देश्यपदसमभिव्याहाराच्च प्रकृतपक्षसाध्यकन्या
यत्वं लभ्यते तेन पर्वतवह्निसाध्यकप्रतिज्ञालक्षणो द्व्यं वह्निमान् वह्निमस्सर्वेतादित्यत्र हेतववयवस्य वह्निमत्सर्वतभागेऽनाति व्याप्तिस्तस्यापि मध्य
मत्वरूपानुपूर्वीद्व्यपक्षकवह्निसाध्यकन्यायानुपूर्वीमत्त्वात् न वा हेतुत्वं धूमीयमिति ज्ञानलक्षणे हेतुत्वपक्षकन्यायान्तरीये धूमादिसवयवेऽति
व्याप्तिस्तस्य प्रकृतसाध्यकन्यायत्वविरहात् एवमपि वह्निसाध्यकपर्वतपक्षप्रतिज्ञालक्षणावधारणावह्निमानिति प्रतिज्ञैकदेशावधारणावह्निमानि
त्यवधारणपदव्यवकलितानुपूर्व्याः प्रतिज्ञाव्यवहारनिमित्तत्वं स्यादिति वाक्यत्वमुपात्तं तदर्थं तु यादृशानुपूर्वीज्ञानत्वेनानुमितिसमानविषयकवाक्या
र्थबोधजनकत्वं तादृशानुपूर्व्यनन्तर्गतत्वं फलतश्चानुपूर्वीविशेषणं एतावन्मात्रमपि हे लाघवपदेऽतिव्याप्तमतउद्देश्यानुमितिसमत्वेनेति तथाच पर्वतो व
ह्निमानित्येतावन्मात्रविषयताकोपोन्वयबोधजनकतावच्छेदकानुपूर्वीमत्त्वमित्यर्थः एवं पर्वतपक्षकवह्निसाध्यकन्यायत्वे सति पर्वतो वह्निमा रा.म.
नित्यन्वयबोधत्वावच्छिन्नकार्यतानिरूपिताकारणतावच्छेदकानुपूर्व्यनन्तर्गतत्वपातादृशान्वयबुद्धित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदका १४

नुपूर्वीसापर्वतपक्षकवह्निसाध्यकप्रतिज्ञाव्यवहारनिमित्तमितिसमुदायार्थः अत्र पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितकेवलवह्नित्वावच्छिन्नविधेय
ताकान्वयबोधत्वस्य कार्यतावच्छेदकत्वलाभाय अन्यूनानतिरिक्तेति अन्यथा धूमवान् वह्निमानित्यर्थकोदाहरणैकदेशे सवह्निमानित्यत्र हेतुत्वं
तभागेऽप्यमादिनिगमनं तभागेऽतिव्याप्तिः स्यादिति ध्येयं॥ ॥दीधितौ पौर्वापर्यापन्नवर्णवृत्तिसमुदायत्वविशेषः प्रतिज्ञात्वं स च पर्याप्त्या स्वाश्र
ये प्रतिज्ञाव्यवहारं जनयति तस्य ज्ञापकमिदं लक्षणमिति वासना प्रकृतन्यायेति पर्याप्तिभिन्ने नैकसमुदायत्ववानिति प्रतीतिसाक्षिकेणास्सं
बंधेनन्यापपर्याप्तसमुदायत्ववत्वे सति यादृशसमुदायत्वावच्छेदेनावयवत्वव्यवहारः तस्य पीप्साधिकरणत्वे सतीत्यर्थकं समस्तमित्यर्थः मतंग
जो नीलइत्यत्र नीलइतिभागवारणायावयवव्यवहारप्रयोजकसमुदायत्वान्यूनवृत्तित्वमपि मुख्यसमुदाये विशेषणं अथवा यादृशसमुदायत्वाव
च्छेदेन प्रकृतन्यायावयवत्वव्यवहारः तादृशसमुदायत्वे सतीत्येव समस्तार्थः स्वोक्तस्य प्रकृतपदस्य मूलोक्तस्योद्देश्यपदस्य प्रयोजनमनेकोक्तावदितुंध
क्तं तद्रूपमित्यत्र वाग्वैचित्र्यसंपादनायोद्देश्यपदं प्रकृतपदेन निर्दिशति प्रकृतेत्यर्थ इति उद्देश्येति पदं प्रकृतपदस्यार्थः पर्याय इत्यर्थः प्रकृतद्रूपमिति
न्याये प्रकृतपदानुपादाने पर्वतपक्षवह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणे वह्निसाध्यकोपनयेऽतिव्याप्तिः अनुमितौ प्रकृतपदानुपादाने पर्वतपक्षक
वह्निसाध्यकप्रतिज्ञालक्षणे तदुपनयेऽतिव्याप्तिः स्यादिति प्रकृतपदद्वयंमवश्यं देयमित्यर्थः एकत्र लक्षणे पदद्वयस्यार्थैक्ये तु पद्यंभिनिवेशस्तदा पर्वतपक्ष
कवह्निव्याप्यधूमसाध्यकप्रतिज्ञालक्षणे न्याये प्रकृतत्वाप्रवेशे वह्निसाध्यकन्यायोपनयेऽतिव्याप्तिः अनुमितौ प्रकृतत्वाप्रवेशे वह्निव्याप्यधूमव्याप्यवानय

१५ ।मितरूपनयेऽव्याप्तिः स्यादिति प्रकृतपदद्वयं आवर्त्तनीयमनुसर्त्तव्यं समुदायार्थमनुवदति तथा चेत्यादि यादृशपक्षकन्यायावयवत्वमेताव
15 तिकृते पर्वतपक्षकवह्निसाध्यधूमसाधकप्रतिज्ञालक्षणस्य पर्वतपक्षकवह्निसाध्यकोपनयेऽतिव्याप्तिः स्यादिति साध्यमपि यादृशत्वेन वि
शेषितं यादृशसाध्यकन्यायेतिकृते विषयतात्वावच्छिन्नपक्षकतदनुमितिविषयतात्वज्ञानजन्यज्ञानीयत्वं तत्साध्यकप्रतिज्ञालक्षणे ज्ञानीय
त्वविशिष्टविषयतान्तदनुमितिविषयतात्वज्ञानजन्यज्ञानीयात्तदनुमितिविषयतात्वादिति न्यायीयहेत्ववयवेऽतिव्याप्तिः स्यादिति तद्धर्मावच्छिन्न
पक्षकत्वमपि न्यायेतदवयवे वा विशेषणं सन्निवेश्य तत्र विशेषणे शुद्धविषयतात्वावच्छिन्नपक्षकतदनुमितिविषयतात्वज्ञानजन्यज्ञानीयत्वं साध्य
कन्यायावयवत्वाभावादेव तत्र नातिव्याप्तिः शुद्धविषयतायां तदनुमितिविषयतात्वज्ञानजज्ञानीयत्वे साध्ये तदनुमितिविषयतात्वादिति हेतुघ
टितो न्याय एव न संभवति प्रतिज्ञाहेत्वोः पौनरुक्त्यप्रतिहतत्वादिति स्वयमेव दीधितिकृताभिधास्यते यद्यपि पुनरुक्तिनानुदृष्टीकोऽसल्लिंगकोऽपि न्या
यत्वे न तदवयवाश्च प्रतिज्ञात्वादिना संग्राह्या अत एव कथायामेकतरस्याः स्थापनाया आभासत्वनियमेऽपि न्यायाभासकथारंभः सूपपद्यते तदा तु
शुद्धविषयताधूमज्ञानजन्यज्ञानीयाधूमादितिन्यायस्य हेत्ववयवे शुद्धविषयताधूमज्ञानजन्यज्ञानीयाधूमलिंगकानुमितिविषयतात्वादिति न्या
यीयप्रतिज्ञालक्षणातिव्याप्तिवारणाय तद्धर्मावच्छिन्नपक्षकत्वं न्यायेविशेषणं तस्य यादृशसाध्यकन्यायावयवत्वं तादृशसाध्यकशुद्धविषयताप राम॰
क्षकानुमित्यन्यूनानतिरिक्तविषयताकज्ञानजनकत्वादेवमनुमितौ तादृशपक्षकत्वमात्रप्रवेशे पर्वतपक्षकवह्निसाध्यकप्रतिज्ञानलक्षणे तत्रतो १५

पनयाति व्याप्तिः स्यात्तज्जन्यज्ञानस्यापि पर्वतो वह्निव्याप्यधूमवानित्यनुमितिसमानविषयकत्वादिति· तादृशसाध्यकत्वमनुमितिविशेषणं ताव
न्मात्राभिधाने तु बुद्धिविषयता धूमज्ञानजन्यज्ञानीया धूमादिति हेत्ववयवेन तत्प्रतिज्ञालक्षणमतिप्रसज्येत· हेत्ववयवजन्यज्ञानस्य विषयता धूम
ज्ञानजन्यज्ञानीयेति तादृशसाध्यकानुमित्यंशे तत्समानविषयकत्वादिति तादृशपक्षकत्वमनुमितिविशेषणं वस्तुतोऽनतिरिक्तविषयकत्वं ता
दृशविषयताकानुमितित्वव्यापकविषयताशून्यत्वं तथा च वह्नि[illegible]साध्यकानुमितित्वादेर्व्याप्तिपक्षादिविषयतेति न धूमत्वमसंभविस्यादिति
साध्यपक्षतदवच्छेदकसंसर्गाणां प्रतिस्वं प्रवेश आवश्यक इति ध्येयं धूमादित्यादि आलोकोऽज्ञेयं वस्तुते न धूमादिति हेत्ववयवेनालोकमित्रवृति
ज्ञाप्यतायाः अपि विषयीकरणादनतिरिक्तपदेनैव तन्निवारणमिति ध्येयं साक्षात्पक्षतावच्छेदकरूपेणानुपापुनरधिकरणत्वेनैवोपस्थाप्य
ते न्यूनतेति असतिपक्षतावच्छेदकपदानुषंगे योग्यतास्वप्रतिसंधानाभावादबाधितत्वाद्यनपेक्षेणानुमितिसामग्री न्यूनात्स्यादिति भावः अनुषंगा
दीति अत्रेदमवधेयं यत्र संपूर्णन्यायघटकवाक्यानामनुसंधानमेकं हेत्वाद्यवयवेषु अयोग्यनिराकांक्षत्वाद्यनुसंधानं स्वरूपं ततः प्रतिज्ञामात्रार्थस्य
वाक्यार्थबोधस्तत्रानतिरिक्तपददाने पि हेत्ववयवे व्याप्तिः जनकपदस्य जनकज्ञानविषयतार्थकत्वावश्यकत्वे न हेत्ववयवादपि तस्यासत
त्वात् अथान्यूनपदोपसंहारेनैव प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहिशाब्दबोधत्वावच्छेदेन पारम्पर्यानुपूर्वीज्ञानत्वेन कारणतावत्त्वं विवक्षि
तमिति न हेत्वादिवाक्येतिप्रसंग इति चेन्न तर्हि येन रूपेण तादृशानुपूर्वीज्ञानत्वेन कारणत्वं विवक्षितमुत येन केनापि रूपेणाद्ये कथं निगम

१६ 16

नेतिव्याप्तिः तत्रत्यवयवत्वं तस्मादवद्वह्निमानित्यानुपूर्व्यवच्छेदेन पर्वतो वह्निमानितिवाक्यार्थबोधजनकत्वं त्वनुषक्तायमादिपदघटितानुपू
र्वीज्ञानत्वे नैवेति वैषम्यात् अनुषक्तपदस्य निराकांक्षत्वप्रतिसंधाने ततो वाक्यार्थबोधाभावेन तादृश्यानुपूर्वीज्ञानस्य कारणत्वावच्छेदकत्वा
त्पौर्वापर्यमेव हि पदानां दीधितिकाराणां मते आकांक्षा हितीयेनुषक्तायंपदघटितवह्निमत्वदानुपूर्वीज्ञानत्वेन वह्निमत्पर्वतमात्रविषयक
ज्ञानजनकतात् तादृश्यानुपूर्वीमादायानतिरिक्तपददाने पि निगमनातिप्रसक्तेर्दुर्वारत्वापत्तिः अथ न्यायावयवत्वप्रयोजकसमुदायत्वावच्छेदे
न वह्निमत्पर्वतबोधकत्वप्रयोजकानुपूर्वीमत्वं विवक्षितं अयं वह्निमानित्यानुपूर्वीनुन्नन्यायावयवसमुदायत्वावच्छेदेन वर्त्तते तस्मादित्यं
शे तद्भावात् उत्तरत्वमध्यमत्वपूर्वत्वरूपायाः प्रत्येकवर्णावृत्तेरव्यानुपूर्व्याः समुदायत्वावच्छेदेन वृत्तिस्वीकारात् अत एव द्वौ रूपवन्तावित्या
दिकः प्रत्ययः तथा चानतिरिक्तपददाने ऽनुषक्तायंपदघटितानुपूर्वीविशेषो भवतीति विशिष्टधूमज्ञाप्यवह्निमत्पर्वतबोधकत्वप्रयोजको व
यवत्वावच्छेदकसमुदायत्वावच्छेदेन विद्यमानश्चेति निगमने ऽतिव्याप्तिवारणायानतिरिक्तपदं तेन च पक्षतावच्छेदकविशिष्टपक्षे साध्यताव
च्छेदकविशिष्टवैशिष्ट्यावगाहिबोधत्वावच्छिन्नातदितरविषयकत्वानवच्छिन्नायाकार्यतानिरूपककारणताप्रयोजकानुपूर्व्या अवयवत्वप्रयो
जकसमुदायत्वावच्छेदेन वृत्तिर्लभ्यते अनुषक्तायंपदगर्भानुपूर्वीप्रयोज्यकार्यतानुपक्षतावच्छेदकादीनरहेतुज्ञाप्यत्वविषयकत्वावच्छिन्ने ति त
च्छ्दासत्त्वादि चेदेवं सति हि किमनुषंगगवेषणेन अयमादिनिगमनांतभागे हेतं तभागे च वर्त्तमानानुपूर्वीमादाय हेतौ निगमने चातिव्याप्तिवारणाय

राम० १६

नतिरिक्तपरामर्शत्वेवच्छिन्नप्रचितं एवमेवाभिप्रायं धा अपि न विचारसहम् इति तत्र तत्तत्सूचयिष्यामः परामर्शहेतुरिति न्यायावयववइत्यर्थः अ
न एवैतेनैतादृशोन्यायावयवत्वमेवानूदितं न च वाधितत्वमसत्प्रतिपक्षितत्वं चापदार्थं तथा कथं निगमनबोध्यमत आह तद्बोधोपयिकेति विशि
ष्टो व्याप्तपक्षधर्मः संबंधाज्ञाप्यत्वमिश्रेत्यर्थोक्तम् अन्यथा दूषयितुं निर्दिशति यत्विति अविषयीकरणात् तद्विषयकवाक्यार्थबोधाजननात् न तु
तादृशवाक्यार्थबोधोपहितत्वं न विवक्षितं समासोदितो वाक्यार्थबोधप्रजनयत्वात् प्रतिज्ञायामव्याप्तिः किं तु तद्योग्यतासाचयत्तत्प्रयोज्यापितत्व ले ४
दाश्रयत्वबोधे तात्पर्यभ्रमः तत्रत्यफलानुरोधादत्रैवेत्यत आह तात्पर्येति अतिप्रसक्तत्वादिति धूमादिति हेतावपि पंचम्याः पर्वते धूमपदस्य
वह्न्यैश्यांकेतात्र प्रतिज्ञासमानाकारवाक्यार्थबोधतात्पर्यस्य च भ्रमेणतादृशबोधजननेयोग्यतावश्यकत्वादिति भावः ननु शक्तिभ्रमनैया
र्थलक्षणाय जन्यस्यानुमितिसमानाकारवाक्यार्थबोधस्य जननानुकूलाकांक्षैवात्र प्रवेश्यते न तु तत्तात्पर्यकत्वमपीति तत्रोदाहरणे व्यत्ये
वातिव्याप्तिरित्यत आह न च तत्पदेति न्यायावयववाक्यावच्छेदेन तादृशाकांक्षावत्त्वमवश्यं प्रवेशनीयमितरथा न तिरिक्तपदादाने पि तत्रोदाह
रणैकदेशे तिव्याप्तितादवस्थ्यात् न चोदाहरणत्वावच्छेदेनात्र प्रकृतानुमितिसमानविषयकवाक्यार्थबोधशाब्दजननानुकूलाकांक्षाविद्यते तत्रे
त्यादिभागे तदभावादिति भावः अत्रेदं बोध्यं मिश्रास्तावत्सत्त्वं तस्य न्यायावयवत्वमर्थ इति न मन्यन्ते किं तु न्यायान्तर्गतत्वमात्रं अत एव प्रत्यक्ष
भागस्य विवरणमभिधायतत्त्वावयवज्ञदवयवसाधारणामतो हेत्वादि आह तत्रेति विशिनष्टि तदुद्देशेति विशेष्यत्वमवनादिति तमालोके अ

१७ तएवच नचावयवांतरस्यानतिरिक्तपदेनैवस्तुदाहादन्यूनपदमधिकमित्यांशांशयोर्धूमवान्सोऽग्निमानित्युदाहरणैकदेशेऽभिमानित्व
17 न्नातिव्याप्तिवारकत्वादिति समाहितमन्यूनपदेनचपक्षतावच्छेदकविशिष्टेसाध्यतावच्छेदकवैशिष्ट्यावगाहिशाब्दबोधजननयोग्यतालाभ
ते साचसर्वमतेप्यानुपूर्वीविशेषस्वरूपाकांक्षा एतावन्मात्रंचन्यायांतर्गतेष्टसिध्यामितरभेदवज्ज्ञानबोधकप्रयोजकाशाब्दतिप्रतिज्ञासमानानु
पूर्वीकेयत्रपृथिवीतरेभ्योभिद्यतेइत्युदाहरणैकदेशेऽपिगतमतोऽनतिरिक्तपदंअतएवालोकेनचपक्षतावच्छेदकस्यचावयवांतरघटितपाद्यत्वा
दन्यूनपदमात्रगर्भतयैवसम्यगित्यांशांशयत्रपृथिवीत्युदाहरणैकदेशेगतत्वेनतावन्मात्रगर्भस्यदुष्टत्वादितिसमाहितं तत्रपक्षतावच्छेदस्येति
द्विशिष्टेसाध्यवैशिष्ट्यस्येत्यर्थः उपलक्षणमिदं मतंगजोनीलइत्यत्रगजोनीलइतिभागेऽतिव्याप्तिवारणायानतिरिक्तपदंदेयमितिध्येयं अनति
रिक्तपददानेनवावयवानंतर्गतत्वंलभ्यते तथाचन्यायांतर्गतत्वेऽवयवानंतर्गतत्वेचसतिशाब्दिकभ्रमनेपार्थलक्षणायजन्यस्यपक्षतपदस्येपक्ष
तसाध्यवैशिष्ट्यावगाहिनःशाब्दबोधस्यप्रयोजकानुपूर्वीमत्त्वंप्रतिज्ञात्वमितिसमुदायार्थःहेतुत्वंतत्रागेऽपमादिनिगमनांतभागेचपानुपूर्वीसा
पक्षसाध्यवैशिष्ट्यावगाहिबोधंप्रतिप्रयोजिकाकिंतुधूमज्ञानहेतुकवह्निज्ञानविषयःपर्वतइतिबोधंप्रतिवन्यादिपदेनवह्निज्ञाननिरूढलक्षणा
सहकारेणैवतादृशानुपूर्व्याःफलोपधायकत्वात् हेतुघटकलिंगप्रतिज्ञानुपूर्वीतुवह्निमन्नामेवपर्वतेबोधयति अतएवनचप्रतिज्ञायांज्ञानलक्ष राम०
णायाऽसंभवइत्याशंकावह्निमानित्यत्रहेतुत्वचयानुपपत्त्याज्ञातव्यत्वलक्षणायांहेतन्वयप्रयोजकालिकमुख्यान्वयबोधमादायलक्षणासंभवादि १७

स्यालोके सत्यामित्यंतमित्यविशिष्यालोकहेतुतामते दीधितिकृतोक्तं दूषणं न प्रवृत्तमिति दिक् । निविशते ऽनुपपत्ते नन्वेवमुपनये हेतुप्रवृत्तिसंधाना
भावाद्बाधितत्वादेरासंगोपनयस्यादित्यत आह वाक्यैकवाक्यनयेति यद्यपि हेतुसहकृतप्रतिज्ञया शुद्धपर्वतत्वावच्छेदेनोपनयनिगमनैकवाक्य
तया धूमवत्पर्वतत्वावच्छेदेन धूमव्याप्यवह्निमत्ताप्रतीयत इति नोपनयत्वं अन्यथा निराकांक्षतया शाब्दबोधस्यैव दुर्लभतापत्तेः तथाप्युपनयेन प
र्वतत्वावच्छेदेन धूमवत्तायां हेतुसहकृतप्रतिज्ञया पर्वतत्वावच्छेदेन हेतुव्याप्यसाध्यवत्तायाः समुदाहरणेन हेतौ साध्यव्याप्तेर्बोधितत्वात् धूमवत्पर्वत
त्वावच्छेदेन व्याप्तिपक्षधर्महेतुव्याप्यसाध्यवत्ताप्यर्थात् प्रत्येतुं शक्यत इति अर्थलभ्यार्थाभिधानस्वरूपमपुष्टार्थत्वं पुनरुक्तपदेन मूलाभिप्रेतमि
त्यभिप्रायः यत्तु वाक्यैकवाक्यतायां पौनरुक्त्यासंभवादेव यदि चेत्युक्तमिति गौडैरुक्तमयुक्तं तत् एवमपि हेतुसहकृतप्रतिज्ञया शुद्धहेतुव्याप्यत्व
स्य निगमने न च व्याप्तिपक्षधर्महेतुव्याप्यत्वस्य साध्येऽभिधानात् पौनरुक्त्यासंभवात् पौनरुक्त्यपदेनाभिविवक्षितगगनसदर्थाभिधानस्यापरिमुक्तमिश्र
सा न त्वदसाराविनाभूतार्थत्वस्यैवाभिधानावश्यकत्वात् ननु न्यूनपदेन पक्षे पक्षतावच्छेदकस्य प्रकृतसाध्यस्य वैशिष्ट्यावगाहिज्ञानं विवक्षित
मुत प्रकृतपक्षतावच्छेदकावच्छेदेन प्रकृतसाध्यवैशिष्ट्यावगाहि आद्ये हेतौ साध्ये साध्यादि द्वितीये यत्रैतादृशो गौडास्तु यद्यपि वह्निव्याप्यधूमवा—
स्त्वुपनयः पक्षतावच्छेदकावच्छेदेन न प्रकृतसाध्यवैशिष्ट्यबोधकस्तथाप्यधिकरणं वह्निमद्भूमादिसादिस्साध्योपनयाभिप्राये तोयं अधिकरण
त्वावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् पक्षवृत्तिसाधनमिसाकुत्रत्युक्तं न हि व्याप्तिपदेनाधिकरणत्वं धर्मितावच्छेदकीकृतसाध्यवत्ताप्रतीयते किं

१८ 18 तुअनवच्छिन्नाधिकरणोसाध्यतावच्छेदकसंसर्गेणसाध्यमित्यनुपपत्तितादवस्थ्यात् ननुसाध्यसहेतुत्वेप्यापद एवनसंभवत्कदाहरणाभाव
त्स वह्निमान्इतिवाक्यस्य वह्निमान् वह्निमानित्यन्वयबोधजनने निराकांक्षत्वात् यदि च वह्निमत्त्वमुद्दिश्य वह्निव्याप्यवत्ता विधीयते वह्निः
शुद्धसंयोगेन वह्निमतिवह्निव्यापकसंयोगेनतावह्निर्विधातुंशक्यते तथापि तदेतत्संसर्गान्तरेणचैकस्योद्देश्यतावच्छेदकविधेयभाव
स्वीकारादित्युच्यते तदापि सिसाधयिषया न्यायप्रयोगानभ्युपगमात् अनुपपन्नता दृष्टोन्यायप्रदत्तत आह यत्रचेत्यादि· एतदिति संपाता
यातं शुद्धपर्वतत्वेन दृष्टांतोपन्यासासंभवात् दृष्टांतस्योपन्यासस्यासार्वत्रिकत्वात् सत्त्वंतस्येत्यादि सत्त्वं तस्यन्यायावयवतार्थकत्वेहेतुत्वं तभाग
स्यतेनैव वारणासंभवात् अवयवाघटकेत्यादि मतंगजो नील इत्यत्र गजो नील इति भागवारणाय घटकेति उदासीनवाक्यवारणाय न्यायां
तर्गतत्वप्रवेशः वस्तुतस्तु सत्त्वं तस्य न्यायावयवत्वार्थकत्वेपि प्रतिज्ञासहकारेण प्रकृतानुमित्यन्यूनविषयकवाक्यार्थबोधजनकहेतुत्वं व
यवेऽतिव्याप्तिवारणाय अनतिरिक्तपदमावश्यकम् तदुपादाने तु येन रूपेणावयवत्वं तेनैव प्रकृतानुमित्यन्यूनानतिरिक्तविषयकबोधज
नकत्वं लभ्यत इति नातिप्रसंग इति स्मर्तव्यं अनतिरिक्तविषयकत्वं यदि प्रकृतानुमितिविषयतान्यविषयताशून्यत्वं तदा धूमादालोकवा
न् पर्वतो वह्निमान् धूमादिति हेत्ववयवजन्यो बोधः प्रकृतानुमितिविषयतान्यविषयताक एवेत्यन्यूनपदवैयर्थ्यं ज्ञानभेदेन विषयताभेदा दा॰म॰
भावेपि अनुमितिविषयता धूमज्ञाप्यहेतुनिर्विशेषणत्वपर्यन्तं न हेतुजन्यज्ञानविषयतानुप्रवृत्तेत्याशयं तत्रेति स्वांतं आस्वांतं अप्रकृतभेद १८

दसत्वात् प्रकृतानुमितिर्मुख्यत्वेनाविधेयत्वमेव नाह तद्दृति पुनरप्रामाणिकमसंसर्गाग्रहादीनामपि मुख्यविशेष्यतानजन्यतावच्छेदिका
किं मुतपक्षतापदामर्शयोः । ततः प्रकृतानुमितिविषयतान्याविषयकत्वमनतिरिक्तविषयकत्वं वक्तव्यं तत्राह यद्यपीत्यादि ॥ ॥ मिश्रमतमाह
कोयेति स्वरूपतः प्रसिद्धासंशयसंभवान्मिश्रमतमनुपपन्नमिति मल्लोपाध्यायमतमुपन्यस्यति प्रकृतेति सर्वपक्षकोपनयेऽति व्याप्तित्वदे
वपरिष्कृते प्रकृतेति प्रकारतासामान्यस्य समनियमो विवक्षितो निरवच्छिन्नप्रकारत्वस्य बाधे सकलाभिधेयवत्त्वीति द्वितीयेऽनित्यइति पक्षसा
ध्ययोर्यर्थ्यवित्तोऽभिधालासंतताभावत्वप्रतियोगित्वद्व्यादयो निरवच्छिन्नप्रकारताता वंत एवोपनयजन्यवाक्यार्थबोधे पीतितत्रातिव्याप्तिरितिभावः अ
त्र द्रव्यं तादात्म्येन साध्यमाकाशं च तादात्म्येन हेतुरतो द्रव्यमाकाशवदित्यत्र नयोः सन्नवो धे द्रव्यत्वाकाशत्वयोरपि निरवच्छिन्नप्रकारत्वमुपपन्नं
माकाशत्वस्य विशेषरूपस्य निरवच्छिन्नप्रकारतासंभवात् तत एव पक्षविशेषणे आकाशपदमर्थवत् यदि चाकाशपदं शाब्दप्रवर्तिते तदा पक्षे नोपा
देयमाकाशपदं सकलाभिधेयनिष्ठत्वं ताभावाप्रतियोग्यभाववदिदं द्रव्यमाकाशाच्छृष्टं हेतुदोप्रतिज्ञाया अपि अभिधेयपदार्थसमाहृत्वगर्भतया प्र
तिज्ञोपनययोर्निरवच्छिन्नप्रकारतयोः समनियमसंभवात् गुणादिहेत्वंतरोपादाने तु गुणत्वादिनिष्ठनिरवच्छिन्नप्रकारतायाएव अनुमितिता दृशप्र
कारता वैयधिकरण्यं स्यात् प्रकृतपक्षइत्यादि अत्र यदि तादृशविषयताविलक्षणविषयताशून्यत्वमनतिरिक्तविषयकत्वं तदा वह्निमद्व्याप्य
वान्पर्वतो वह्निमान् वह्निमद्व्यादित्यत्र हेत्ववयवे तिव्याप्तिवारणाय पक्षे प्रकृतेति यदि च व्याप्यविषयकत्वं तदा पर्वतो वह्निमान् वह्निमद्व्यादि

साध्यवद्यतिव्याप्तिवारणाय तन्न अथ यदि व्याप्यविषयकत्वमनतिरिक्तविषयकत्वं तद्धा साध्ये प्रकृतपदस्य फलमाह प्रकृतपञ्चम्यर्थेति तथा च सा
ध्ये प्रकृतपदानुपादाने हेतुत्वं ज्ञेयत्ववत्त्वाच्चलादिस्तत्र हेत्ववयवेऽतिव्याप्तिः स्यादिति भावः प्रकृतपदोपादाने तु द्वार इत्याह ननु प्रकृतेति हेतुत्वं वा
च्यवद्व्याप्यादिस्यादिकं तु न न्यायःसिद्धसाधनादिस्थाप्य ताद्दृशविषयताविलक्षणविषयताशून्यत्वे तु पर्वतो वह्निमत्पर्वतादालोकवद्वह्निधर्मवान् व
ह्निमत्पर्वतादिस्तत्र हेत्ववयवेऽतिव्याप्तिवारणमेव साध्ये प्रकृतत्वप्रवेशप्रयोजनमित्यनुसन्धेयं॥ तादृशेति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयतेत्य
र्थः तद्भिन्नलक्षणत्वं तादृशविषयताव्यापकत्वं तथा च यादृशविषयता बुद्धित्वसत्त्वं ताभावप्रतियोगिविषयताशून्यत्वमनतिरिक्तविषयकत्वं वाच्यमिति
भावः ननु प्रतिज्ञाजन्यशाब्दबोधविषयताव्यक्तिः तादृशबोधांतरनिष्ठां सत्ताभावप्रतियोगिनी सम्भवोत्तानभेदेन विषयताभेदान्तदभावेऽपि विषयभे
दात्तद्भेदस्याव्यापकत्वेन वह्नित्वेन पर्वतवह्निवृत्तिविषयताव्यक्तेर्वह्नित्वेन महानसवह्निमात्रावगाहितादृशबोधनिष्ठसत्ताभावप्रतियोगित्वात्क
स्याऽपि विषयताया व्यापकत्वाभावादसम्भवः वह्नित्वेन यावद्वह्निवृत्तित्वैक्याविषयता पुनरप्रामाणिकी न च साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपि
तपक्षतावच्छेदकावच्छिन्नविशेष्यताया वस्तुतत्त्वद्विषयताविशिष्टशाब्दत्वाव्यापकविषयताशून्यत्वमनतिरिक्तविषयताकत्वमिति वाच्यं एवं सत्यपि धू
मादालोकवान्पर्वतो वह्निमान्धूमादिस्तत्र हेत्ववयवेऽतिव्याप्त्यसम्भवेनाऽन्यत्र पदवैयर्थ्यप्रसंगात् हेतुत्वावयवजन्यवाक्यार्थबोधस्य धूमज्ञाप्यत्वनिष्ठ
विषयताया मुख्यविशेष्यतात्वेन तादृशशाब्दबोधताव्यापकतयाऽतिरिक्तपदेनैव तद्वारणात् न च मुख्यविशेष्यताऽनतिरिक्ता किं तु धूमादालोकवान्

धूमादिरूपसाध्य। एषे केवलाच धूमादालोक इत्यत्रालोकनिष्ठविशेष्यतानिरूपितविषयतात्वेन तज्ज्ञानीयेनावच्छिन्ना धूमादित्वत्र तु [illegible] दवच्छिन्नेति वि
शेष इति वाच्यं एवं सति धूमादालोक इति ज्ञाप्यत्वीय आलोको धूमायं ज्ञाप्यत्वमिति ज्ञानयो रैवलक्षण्यप्रसंगात् परंतु स्वतंत्रविशेष्यतयोर्भेदाव्यापक
त्वादिसत्तः पक्षांतरमाह प्रकृतहेतुकेति अन्वयव्यतिरेकभेदादन्योन्यासंताभावभेदाच्च विभिन्नानां व्याप्तीनामनुगमनार्थमोपपिकांतं यादृशविषयताक
ज्ञानत्वेन व्याप्तिज्ञानस्य तल्लिंगकतत्साध्यताकानुमितिकारणत्वं तादृशविषयताशून्यत्वे तात्पर्यं तल्लिंगकेत्यस्य फलमाह वन्हीति तादृशालोकवत्सर्व
ते वन्हेः संशयस्य विप्रतिपत्तेरयोगात् न्यायएव नप्रवृत्त इत्यत आलोकस्य व्याप्यत्वे पक्षधर्मतायां च गृहीतायां हेत्वंतराकांक्षानुदयाद्वा सधर्मेति प्रकृतसाध्यके
त्यस्य फलमाह इंधनेत्यादि व्याप्यविषयकत्वस्यानतिरिक्तविषयकत्वपदार्थत्वे उदासीनवाक्यवारणाय न्यायावयवत्वमेव प्रवेशनीयं न तु वयवा घट
कन्यायांसंगतत्वं तथा सति हेत्वंतभागेऽतिप्रसंगादनतिरिक्तपदं तु पर्वतत्वावच्छेदेन वन्हेः साध्यतायां पर्वतदृष्टीतवत्त्वदाहरणेऽतिव्याप्तेर्वारणाय
न च यत्र पर्वतत्वावच्छेदेन साध्यसिद्धेरुद्देश्यतायां वन्हिमत्पर्वतादित्यादावात्मेन हेतुस्तत्र वन्हिमत्पर्वतादिहेतावतिव्याप्तिः पर्वतत्वसामानाधिकरण्येन व
न्हिसिद्धावपि तादृशन्यायाभ्युपगमादिति वाच्यं पर्वतत्वावच्छेदेन वन्हिसिद्धिं विना वन्हिमत्पर्वतस्यापि तदवच्छेदेन परामर्शासंभवादेतादृशन्यायस्य सिद्ध
साधननियमेनानभ्युपगमात् यदि च तादृश एव साध्ये वन्हिमत्पर्वतसंयोगादिति हेतावतिव्याप्तिरित्याशंक्यते तदामुख्यविशेष्ये पक्षे साध्यवैशिष्ट्या
वगाहित्वमन्यूनविषयकत्वं प्रवेश्यमनन्यगतिकत्वात् आकांक्षाविरहेणेति आकांक्षाप्रामाणिकानां समयबंधप्रतीतायां व्याप्तौ पुनर्नाभिधानस्य

२० मित्येवं रूपा ॰ विरहेणाविरोधेन उदाहरणोक्तपतलक्षणं इदमापरामृष्टेवह्निमाप्यधूमवत्पर्वते तादृशधूमानन्वयात् उपनयासंभवोपि द्रष्ट
20 व्यः नन्वप्रतिज्ञाया विषयाभिमितानामाभिरुदाहरणोपनयाभ्यां प्रतिपादनीयेति न समयबंधो निराकांक्षत्वं वेत्यतआह अन्यथेति अतिप्र
संगात् हेतुरुद्देश्योपादानप्रसंगात् तथा च यथा तत्साध्यगमकेकस्मिन्नपि हेतावभिहिते हेतुत्वं तदंनोपादेयमिति समयस्तथा तत्र हेतौ साध्यगम
कतोपस्थितिः कस्मादपि व्याप्तावभिहितायां नव्याप्त्यंतरोपादानमित्यपीत्यतो निरूक्तन्यायएवासंभवी कुत्र प्रतिज्ञायामतिव्याप्तिरिति भावः उभय
मात्तु पक्षासोपीत्यत्र अभिन्नाभ्यां वा काभ्यामिति शेषः तेनोभयव्याप्तिबोधकमुदाहरणमभिधास्यमानं नानुपपन्नं भवतीति ध्येयं न ... न्वेवं गोदि
ति प्रत्यभिज्ञायां मित्रदत्तविशिष्टे साध्यस्य गोत्वस्यानवगाहनात् कथमनुमितिसमानविषयकज्ञानप्रयोजकत्वमतो गोत्वस्य साध्यत्वाभावं व्य
वस्थापयति गोत्वत्वाद्येति साध्यतानुमितिविधेयता सा च किंचिद्धर्मावच्छिन्नेति नियम इति हृदयं नन्वनवच्छिन्नगोत्वविधेयकाप्यनुमितिः संभ
वत्येवसा स्वसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकगोत्ववान् गौरितिसास्नावदिदमिति परामर्शस्य तादृशानुमितौ कारणत्वसंभवा
दत तादृशगोत्वसाध्यकन्यायासंभवमाह पदार्थेनेति जातावित्यनेनान्वयितावच्छेदकरूपानुपस्थितिरभिहिता तेन घटादन्यइत्यत्र पदार्थ
तावच्छेदके अन्यत्वे पंचम्यर्थान्वयेपि न क्षतिः किंचिद्धर्मावलीढएव पदार्थांतरान्वय इत्यभिमानः अयं गौरिति प्रतिज्ञया केवलयापक्षे गवाभे रा॰म॰
दः प्रत्याय्यते हेतुसंवलितया तु गोपदस्य गोत्वविधेयकज्ञानविषयत्वलक्षणावशात् स्वात्वाज्ञानजन्यगोत्वविधेयकज्ञानविषयोपमित्यन्व २०

पवोधोजन्यतइतिनव्याप्यानुपपत्तिरिति बुध्येयं तथैव वन्हेरेव साध्यत्वे ननु वन्हिमन्न अन्यथा वन्हिमद्व्याप्यवान्नयमित्यत्र पनयः स्यादिति भावः
ननु वन्हिसाध्यकप्रतिज्ञालक्षणे वन्हिमद्भेदावगाहित्वस्वरूपमन्यूनविषयकत्वं प्रवेश्यं न च वन्हिमत्साध्यकप्रतिज्ञायामतिव्याप्तेः न्यायां तग
तत्वदलेनैव तन्न्यूनत्वादिसत्त्वात् आह एवमिति आदिपदेनान्यपदनञ्पदयोरुपग्रहः सूक्ष्ममित्यनेन विवर्ह्वि स्वमत्वस्य चिंतितं तथाहि साध्यविधेयता
निरूपितपक्षावृत्तिस्यताकत्वमेवात्रान्यूनविषयकत्वं अयं गोः पर्वतो वन्हिमान् चैत्रः पक्वा पृथिवी तत्प्रभिन्नेत्यादौ गुडुगोले वन्हेर्याककृताविति तरभे
दे च विधेयतापर्याप्त्यवच्छेदकत्वे ननु प्रकारीभूतेपि गोवन्हिमदादौ अन्यायस्वरूपकारता अन्यैव च विधेयता न हि साध्ये न पदांतर्दलस्यो धर्मो विधीयते
किंतु धर्ममात्रमत एव विशेष्यविशेषणभावेनान्वयाभावेपि स्वर्गकामो यजेतेत्यादौ स्वर्गमुद्दिश्य यागकरणिकाभावना विधीयत इतिमद्वाव्य
पदिशन्ति यत्र चानुकूलत्वेन याकः कृतौ प्रतियोगितया इतराणि समवायेन गुणो वानुमितौ विधेयतावच्छेदकस्तत्र याककृतिमानितरभिन्नो
गुणवान्नित्यादिकप्रतिज्ञाजन्यवाक्यार्थबोधेपि तथा पाकपदस्य पाकानुकूले इतरपदस्येतरप्रतियोगिके गुणपदस्य गुणसमवायिनि निरूक्षिमत्वेन
तत्तत्पदार्थस्य विधेयविशेषणत्वेनान्वयेपि विधेयतावच्छेदकत्वाभावात् तद्विशेषणतापन्नविशिष्टविशेष्यतावच्छेदकत्वोपगमात् अत एव सो
मेन यजेतेत्यादौ सोमपदस्य मत्वर्थलक्षणायामपि सोमविशिष्टो यागो भावनायामुद्दिश्यकरणतया विधीयत इति तौतातिताः नन्वेवमपि पर्वतो वन्हि
मानिति प्रतिज्ञाजन्यवाक्यार्थबोधस्यानुमितिविषयमत्वर्थं तादात्म्यादिविषयकत्वादनतिरिक्तविषयकत्वं दुर्घटमिति चेन्न अन्यूनपदेन प्रकृता

२१ 21 नुमितिविधेयत्वस्यानतिरिक्तपदेन तद्भिन्नविधेयताशून्यत्वस्य विवक्षितत्वात् साध्यतावच्छेदकेतरधर्मानवच्छिन्नविधेयतानिरूपितपक्षताव
च्छेदकावच्छिन्नोद्देश्यताशालिवाक्यार्थबोधजनकोऽन्यायावयवः प्रतिज्ञेति समुदायार्थः हेत्वंशभागेनाप्रमादिनिगमनांशभागेन च जनितस्य वाक्या
र्थबोधस्य विधेयतासाध्यतावच्छेदकेतरेण धूमज्ञानजन्यत्वादिनावच्छिन्नेति न तयोरतिव्याप्तिः ननु तथापि पर्वतो जातिमानिति प्रतिज्ञालक्षणे पर्वतो
द्रव्यमित्यत्रातिव्याप्तिः तत्र द्रव्यत्वनिष्ठविधेयतायाः केनापि धर्मेणानवच्छिन्नत्वात् पक्षसाध्यभेदेन प्रतिज्ञालक्षणभेदावश्यकत्वे घटे जातिसाध्यक
प्रतिज्ञालक्षणे केवलान्वयांगीतत्वस्यैवोपादेयत्वात् न्यायप्रकृततोपादाने प्रयोजनविरहात् साध्यतावच्छेदकावच्छिन्नत्वस्यापि विधेयताविशेषणा
त्वे इदं द्रव्यमिति निरवच्छिन्नविधेयताकप्रतिज्ञायामव्याप्तिरिति चेन्न विधेयोद्देश्यभेदेन प्रतिज्ञालक्षणभेदावश्यकत्वे निरवच्छिन्नद्रव्यत्वादिसाध्य
कप्रतिज्ञायास्तथाविधविषयताकवाक्यार्थबोधजनकवाक्यत्वेन निर्वचनसंभवात् अनुमितिविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादिरिति हेतुत्ववय
वैयर्थ्यातिव्याप्तिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नत्वमुद्देश्यताविशेषणं हेतुजन्यवाक्यार्थबोधस्योद्देश्यतानुमानानुमितिविषयतात्वेनावच्छिन्ना
किं तु शुद्धविषयतात्वेन यदि चैकपदार्थयोर्ज्ञानविषयत्वयोर्नोद्देश्यविधेयभावेनान्वयः तदा प्राचीनमते जनकतामात्रस्य पंचम्यर्थतया घटजनकता
धूमज्ञानीया धूमादिस्तत्र हेतुत्ववैयर्थ्येऽतिव्याप्तिवारणायोमुद्देश्यताविशेषणप्रवेशः यदि प्रकृतिप्रत्ययार्थयोरपि नोद्देश्यविधेयभावेनान्वयस्तदा राम.
नोपादेयमेव तदिति दिक् तदायाद्दृशोऽसादिमाद्दशास्ताधिका तावति कृते अनुमितिविषयत्वं धूमज्ञानजन्यज्ञानीयं धूमादिस्तत्र हेतुत्ववैयर्थ्येऽतिव्या २१

प्तिः विषयत्वपक्षके तत्साध्यकप्रतिज्ञातुल्यविषयकत्वादतो यादृशव्याप्तिकाऽइति तावन्मात्रे ज्ञते पर्वतो वह्निव्याप्यधूमवानिति प्रतिज्ञा समा
नविषयके पर्वतपक्षकवह्निसाधके पनये तथाविधप्रतिज्ञालक्षणातिव्याप्तिरतो यादृशसाध्यिकाऽइति पक्षे यद्धर्मविशिष्टे तेन संयोगेन व
ह्नेः पक्षतावच्छेदकत्वे वह्निमत्सर्वतो द्रव्यमित्यादिप्रतिज्ञोपग्रहः शक्तिभ्रमनैयायार्थलक्षणादिनापर्वतो वह्निमानिति प्रतिज्ञापि धूमीयहेतुत्वमिति
बोधस्य जनिका भवतीति हेत्वेवयेऽतिव्याप्तिवारणाय संप्रदायसिद्धाऽइति हेत्वंशभागे यमादिनिगमनांतभागे चातिव्याप्तिवारणाय निवर्त्तकांतं प
लतोऽनतिरिक्तविषयकत्वस्वरूपनिर्वचनं सत्यतमाध्यसावयवाघटकन्यायांतर्गतत्वपरतायामिदमुपादेयं न्यायावयवत्वपरत्वे तु नोपादेयमेव अ
त्रकल्पे सिसाध्यिषया न्यायप्रयोगो नाभ्युपेयते इतरथा हेतुत्वं धूमीयं धूमादिति हेत्ववयवेऽतिव्याप्तिदुर्वारात् यद्यपि धूमव्याप्यवह्निमान् पर्व
त इति बोधजनकत्वेनापि प्रतिज्ञासंप्रदायसिद्धा तद्बोधानिवर्त्यो न हेतुत्वं धूमीयं न वा वह्निव्याप्यो न वेत्यादिकः संशयइति तद्बोधानिवर्त्तनीयसंशय
निवर्त्तके तरस्य तावन्मात्रमबोधस्य जनकत्वं तन्माऽतिव्याप्तं यदि च प्रतिज्ञासंप्रदायाविच्छेदकानुपूर्वीज्ञानत्वेन यादृशयादृशविषयताकशाब्दत्वा
वच्छिन्नं प्रतिजनकत्वं तादृशविषयताकनिर्णीतत्वावच्छिन्नप्रतिबंधकतानिरूपितप्रतिबध्यतानधिकरणसंशयाप्रतिबंधकत्वं प्रवेश्यते तदा संश
यपदं देयम् तावदन्यतमबोधानिवर्त्तनीयानिवर्त्तकत्वमात्रस्य वसम्यक्त्वात्तथापि तादृशनिर्णयत्वविशिष्टव्याप्तिवध्यसमानविषयकशाब्द
स्य शाब्दबोधोजायतामितीच्छायाश्च निवर्त्तकः सर्वेपि शाब्दबोधइत्यसंभववारणाय संशयेति अत्रेच्छामादायासंभववारणाय ज्ञानत्वप्रवेश एव

२२
22

प्रतीयते ननु विशिष्य संशयत्वप्रवेशः न च सामानाकारशाब्दसामान्यं न शाब्दसामान्यप्रतिबंधकं किंतु बुभुत्साविरहविशिष्टमेव तथा सति ताद्
शानिर्णयसामान्याप्रतिबंधकशाब्दनिवर्तकबोधजनकत्वात् प्रतिज्ञायामव्याप्तिवारणाय तदितिवाच्यं यत्र चांतरेणाग्रिमग्रंथे न विवक्षितस्य ता
दृशनिर्णयाप्रतिबंधकशाब्दबोधानिवर्तकशाब्दत्वरूपयोग्यत्वस्य तत्रापि सत्वेनाव्याप्तिविरहादिति केचित् तदसत् स्वरूपयोग्यतामात्रस्यातिप्र
सक्तत्वात् प्रतिज्ञायामव्याप्तिवारणार्थं तस्यावश्यकत्वात् सर्वथा शाब्दानुपसर्जकप्रतिज्ञायां योग्यताया अव्यादरणीयत्वात् सर्वं तु न तथा
सति नयेव निर्वाहे उपधानस्य कुत्रापि निवेशाप्रसंगात् साध्यादिभेदेन प्रतिज्ञालक्षणस्य भिन्नत्वात् धूमादालोकवान् पर्वतो वह्निमान् धूमा
दित्यत्र हेतुत्वये ऽतिव्याप्तिवारणाय तावदन्यतमम् इति फलतो ऽन्यूनविषयकत्वनिर्वचनं तत्र साध्यसाधनादिभेदेन प्रतिज्ञालक्षणभेदात् कुत्र
चित् साधने एकविधः क्वचिदन्यतरः क्वचिदन्यतमः निवेशनीय इत्याह एवं चेति इदंपक्षकगोसाध्यकप्रतिज्ञालक्षणे निरुक्तबोधानिवर्तनीयसंश
यानिवर्तकबोधजनकन्यायावयवत्वमात्रं प्रवेश्यमिति तस्यान्यूनविविषयकत्वभागस्य व्यर्थत्वात् देवादेकत्वादिसंख्यामप्यनवगाहमानस्येदंपदार्थके
वलंगोतादात्म्यावगाहिबोधस्य जननयोग्यतामादाय तत्र लक्षणसंगमनमिति ध्येयं संयोगेन समवायेन समवेतरूपलक्षणादेः पिकादिवृत्तिनिया
मकसंबंधमात्रस्यान्यतरत्वेन प्रवेशस्थलमुदाहरति समवायेनेत्यादि पाककृतिमत्वं चैत्रः पचतीत्यत्र कर्तृभेदश्चैत्रः पाचक इत्यत्र तथा च त राम०
थाविधान्यतमबोधानिवर्त्यसंशयानिवर्तकबोधजनकन्यायावयवत्वं तथाविधप्रतिज्ञालक्षणमिति भावः अन्यतमत्वेनैव बोधानां प्रवेशस्थ २२

त्वमुदाहरति विशेषणतयेति पृथिवीतरेभ्यो भिद्यते इतरान्या अनितरा वा नेतरा लोइतरभिन्नेतिक्रमेण चत्वारि प्रतिज्ञाकाराणि अन्यपद
मन्योन्याभावत्वरूपेणाभिन्नपदं तदाश्रयत्वेन धर्मिणं बोधयतीति भेदः अत्र तावदन्यतमबोधानिवर्तनीयसंशयनिवर्तकबोधजनकत्वाघटकावयव
त्वं शुद्धपृथिवीपक्षकेतरभेदसाधकप्रतिज्ञालक्षणं तावन्नान्यतम इति तु न प्रवेशनीयं प्रयोजनविरहात् प्रवेशनीयं तु पृथिवीत्वात् गंधवत्ती पृथिवी
तरेभ्यो भिद्यते पृथिवीत्वादित्यत्र तादृशपृथिवीपक्षकप्रतिज्ञालक्षणे हेतुवचनेऽतिव्याप्तिवारणायेति ध्येयं कस्यचिन्मतमुपन्यस्यति तावदिति तस्य
न्नत्वाधिका प्रतिज्ञा यादृशयादृशबोधजनकतया संप्रदायसिद्धा तावदन्यतमेत्यर्थः इदं तु पूर्ववद्धेतुत्वं नभागेऽतिव्याप्तिवारणाय नातिरिक्तविषय
कपदार्थविरहात् संशयपदोपादानप्रयोजनं पूर्ववत् धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादिहेतुवचनेऽतिव्याप्तिवारणाय संशयनिवर्तकांत
निरुक्तहेत्ववयवजन्यबोधस्तु तावदन्यतमबोधनिवर्त्यसंशयावतारसंशयान्तर्गतस्य पर्वतो वह्निमान्न वेति संशयस्यैव निवर्तक इति तद्व्युदासः पृथिवीने
तराणीत्येवमाकारकतादृशान्यतमबोधनिवर्तनीयसमानविषयकानुमितिनिवर्तकत्वं पृथिवीतरेभ्यो भिद्यते इति प्रतिज्ञाजन्यबोधस्य नास्तीति तत्रा
व्याप्तिवारणाय संशयेति अत्र पृथिवीतरभिन्नेति बोधस्य तावदन्यमान्तर्गतस्य निवर्त्यः पृथिवी आश्रयो न वेति संशयस्तेन बोधेन कश्चस्यापार्थस्याश्र
यस्य पृथिव्यां तादात्म्येनानवगाहनात् तन्निवर्तकत्वं पृथिवी नेतराणीत्यन्वयबोधस्य न संभवति समानविषयकत्वेन प्रतिबंधकतावादेऽपि प्रतीत्यवि
षयीभूताश्रयतादात्म्यसंदेहे तस्याविरोधित्वादित्यस्वरसः ॥ ॥चैत्रः पचति घटो नेतराणीत्यादावुपनयासंभवात् प्रतिज्ञापि न संभवतीत्याशंकामाह

२३ 23 चैत्रइत्यादि॥ ॥अत्रेदंचिंतनीयं॥पाचकत्वव्याप्यवान्अग्नित्वव्याप्यवानित्यादिकोनव्यानामपिप्रवचएवोपनयः एतादृशस्थलेहुतवह्नित्वस
मासेभ्यःसंबंधाभिधानंभौवप्रत्ययेसत्तुशासनादेकपदार्थसंसृष्टद्वितीयपदार्थतावच्छेदकस्यैवत्वप्रत्ययेनाभिधानात् ननुपाचकत्वमित्यादाव
नुकूलतासंसर्गेणपाकविशिष्टप्रयत्नस्याभावप्रत्ययेनाभिधानेपितस्यपक्तृत्वसर्थविशिष्टस्यैवव्याप्यत्वेनान्वयोनतुकेवलस्येति·पाचकइतिया
कहृतिव्याप्यत्वंलभ्यतेनतुकेवलपाकहृतिव्याप्यत्वमितिचेत् किंचातःतर्हिवन्हौसाध्येप्रमेयवह्निव्याप्यवानित्युपनयोपिप्रसज्येतेतिचेत् नन
त्रप्रमेयपदंविनापिवह्निपदप्रयोगसंभवेनाधिकपदप्रयोगेननिग्रहादिहतुपाचकपदप्रयोगंविनाप्रत्ययप्रयोगासंभवात् विशेषोपस्थापक
त्वाच्चाधिक्याभावात्॥ ॥परेतुपाकहृतिव्याप्यवानितरान्योन्याभावव्याप्यवानित्याकारकएवात्रोपनयःहृत्यन्योन्याभावपदयोर्व्याप्यान्वयानुरोधे
नलक्षणयाश्रावयपाकत्वेनुकूलत्वप्रतियोगितादिसंसर्गेणपाकेतरादिविशिष्टान्योन्याभावसंबंधिनिलक्षणापूर्वपदंतात्पर्यमात्रग्राहकमिति स ५
सर्वसामंजस्यादितिप्राहुः वन्ह्यादिसाध्यकस्थायएवनास्तिकृतःप्रतिज्ञापर्यंतस्त्येत्यादिकृतुनप्रतिज्ञाविप्रतिपत्त्युपस्थितेकोटिद्वयेसर्वनाम्नासाध्य
निर्देशस्यापरिच्छेदकत्वात्तद्रूपसाध्यवत्तोयथाश्रुतमूलमुपपादयंतोमतमुपन्यस्यतिकेचित्त्वित्यादि विप्रतिपत्तिकोटितामात्रंनजिज्ञासानिमि
त्तकमित्यतस्तदधीनसंशयेचेति तथाचविप्रतिपत्त्यधर्मिताकाःकोयोग्याःवह्निमत्तदन्योन्याभाववयोरुपस्थितिस्तृष्यमानसःसंशयस्ततोदुःखमयदुः शम०
खानुव्यवसायःततोदुःखद्वेषोऽथदुःखसाधनतयावह्निमत्तदन्योन्याभावकोटिकसंशयस्यग्रहणमतस्तन्नद्वेषस्ततःसंशयसाधनतयावह्नि २३

मत्तद्म्मोन्याभावान्यतरनिर्णयाभावस्यप्रतिबंधानमयतत्रद्वेषस्ततोद्वेषयोनिस्तदन्यतरकोटिनिर्णयइच्छाभवतीतिभवतिवन्हिमान्वजिज्ञासित
इतिभावः अत्रसंशयएवविप्रतिपत्तिरूपस्थितवन्हिकोटिकोवन्हिमत्कोटिकसंदेहसाधनत्वेनवन्हिनिर्णयाभावेद्वेषस्तन्निर्णयेच्छाचसंभवतीति
वन्हेरप्रजिज्ञासितत्वात्तत्साधनेनार्थांतरमित्यसत्त्वंवृत्तंत्रचिन्हचेनेत्यस्यार्थः॥ योऽयतावदमापाततः अप्योऽपेपिन्यायपत्नीकाराद्ततएवन्यायाभ्यांकथारं
भइत्यपपद्यतइतिस्मर्त्तव्यं तथाचेत्यादि उद्देश्यानुमितित्यन्यूनानतिरिक्तविषयकेत्यज्ञान्यूनानतिरिक्तपदपरिहारे उद्देश्यानुमितिविषयकेत्यवशिष्टत
त्रचसत्यनभ्युपगमान्नोत्तरपददलोपादुद्देश्यानुमितोविषयइवविषयोयस्येतिविग्रहलाभादनुमितिसमानविषयकत्वंपर्यवसन्नमितिभावः अत्रसत्संतभा
गस्यावयवगघटकन्यायांतर्गतत्वंनार्थः तथासतिचैत्रोविरुद्धोऽश्माकाशत्वादित्यत्रचैत्रोविरुद्धोऽश्मोत्संतभागेऽतिप्रसंगादतएवात्रन्यायावत्वंसत्त्वेना
र्थत्वेनसाध्योतमपिपुनरुक्तं पक्षविशेष्यकत्वविवक्षायाःफलंदर्शयितुंपक्षविषयकमुदाहरणंदर्शयति यथेतिदृष्टांतवचनउदाहरणस्यवारणाय
त्यन्वयः योयोधूमवान्सवन्हिमान्यथाह्रदमित्रमित्यादेर्निर्वन्हित्वहेत्वयाहकत्वेतिशेषः दृष्टांतप्रयोगस्यासार्वत्रिकत्वात्स्थलांतरमाह ह्रदावृत्तीत्या
दि ह्रदोनिर्धूमोह्रदावृत्तिधर्मवत्त्वादित्यत्रयोयोधूमवान्सह्रदावृत्तिधर्मवानित्युदाहरणाजन्यप्रतीतेर्लिंगविषयकत्वात्पक्षविषयकताघतद्वार
णायपक्षमुख्यविशेष्यकत्वंसमानविषयकत्वंतात्पर्यार्थावाच्यइत्यर्थः केवलान्वयिनिव्यतिरेकिणाप्रयोगोनास्तीत्यभिमानेनेदमन्यथादृष्टः कपिविभा
गाभाववान्कपिसंयोगाभावादित्यादौयोयःकपिविभागवान्सकपिसंयोगवान्यथावृक्षइत्युदाहरणं॥ निगमनातिरिक्तेतिध्येयं उपनयेतिनिगमनंपक्ष

२४ तावच्छेदकावच्छिन्नविशेष्यकत्वविवक्षमापि व्यावर्त्तयितुं शक्यत इत्यपनयपर्यन्तानुधावनं इदमुपलक्षणं हेतुत्वप्रमेयत्वज्ञेयत्वादिस्वत्रहेतु
25 वचनेऽतिव्याप्तिवारणाय पिलिंगाविषयकत्वोपादाने प्रयोजनमवसेयं प्रकृततत्पदं यदि लिंगतावच्छेदकविधेयार्थकं तथा सत्यादृशं गंधवती
तीयं तथा दि उपनयासंभव इति तथा च प्रकृतन्याय एव नास्ति कुत्र प्रतिज्ञायामव्याप्तिरिति भावः साध्याभावेति तथा चेत्तद्व्याप्यगंधाभा
ववतीचेयमित्येवोपनयप्रयोग इति भावः। प्राचामिति॥ व्याप्तिमुदाहरणोक्तां भातत्पक्षधर्मतामात्रमुपनयेन प्रतिपाद्यत इति प्राचामभिसं
धिः पक्षविशेषणत्वेनेत्यादि यद्यपि गंधवतीमियमिति गंधादिस्वत्रपक्षविशेषणतामित्वापि गंधे विशेष्यता विद्यत एव नच गवाक्षयोरिव प्र
कारत्वविशेष्यत्वयोरैक्यासंभवः यत्तु पक्षविशेषणताभिन्नाया हेतुतावच्छेदकावच्छिन्नाविषयतातच्छून्यत्वमर्थः गंधवत्सक्तेके च पक्षविशेष
णतैव गंधत्वावच्छिन्ना न तु विशेष्यतेति तन्न सुरभिगंधवती तथा गंधादिस्वत्रसेऽभत्वप्रकारतानिरूपितविशेष्य[illegible]तायां गंधत्वावच्छिन्नत्वा
त् सुरभित्वगंधत्वोभयावच्छिन्नविशेषणतान्यतान्याव्याप्तितादवस्थ्यात् तथापि विशिष्टवैशिष्ट्यबोधे मुख्यविशेषणांशे प्रकारत्वविशेष्यत्वयोरभे
द एवेत्यभिमानेनेदमेवं साध्याविशेषणत्वमपि निर्वाच्यं दधिद्वयं दध्न इत्यत्र दधिद्वयरूपकमात्रग्राहिकापि प्रतिज्ञा संभवतीति नच द्याणकं हे
तुर्दधिपक्षे समवेतत्वाभावादाह प्रमेयत्वमभिधेयमिति अत्र घटादिवृत्तिप्रमाविषयत्वमेव प्रमेयत्वं तन्निष्ठमाविषयत्वं न तु अतिरिक्तं विष राम०
यत्वे विषयत्वान्तरस्वीकारेऽनवस्थानादित्यभिप्रायेणोदं इतरथात्वाहगोत्वाभाव इति उपनयस्येति उपनयेव्याप्तिर्न निविशत इति प्राचां मतेन २४

साध्याभाववद्वृत्तित्वमेव व्याप्तिरित्यभिप्रायेण साक्षात्परंपरासाधारणपक्षविशेषणतानाप्रवेशाभिप्रायेणावोपनयातिव्याप्तेरभिधानमन्य
था व्यापकताविशेषणतया साध्यसाधनसोपनयेन बोधनात् साधनव्यापकसाध्यसमानाधिकरणसाधनवानयमित्येवंविधेऽस्मिन्नति व्याप्यनव
काशात् तथापीत्यादि गंधवती भिद्यते गंधादित्यत्र प्रतिज्ञासंग्रहाय पक्षतावच्छेदकविशिष्ट इति पर्वतो वह्निसामग्रीमान् वन्हेरित्यत्र न तत्संग्रहा
य साध्यतावच्छेदकविशिष्टेति नन्वत्र को वह्निर्भावपदार्थः न तावद्भेदः तादृशवैशिष्ट्यविषयताभिन्नलिंगविषयताशालेन गंधवती भिद्यत इत्यत्रे
वाव्याप्तितादवस्थ्यात् नाप्यव्यापकत्वं विषयतापा विषयभेदेन ज्ञानभेदेन वाभिन्नतया सर्वस्या एव विषयतायास्तादृशवैशिष्ट्यविषयताया
अव्यापकतादित्यतः पक्षांतरमाह वस्तुत इति यद्वा यथाश्रुते गंधवती भिद्यत इत्यत्र पक्षे साध्यवैशिष्ट्यं न विषयः किंतु साध्याश्रयत्ववैशिष्ट्यमि
ति तद्विषयतावच्छिन्नत्वमेव लिंगविषयत्वमित्यव्याप्तितादवस्थ्यं अथ यादृशयादृशविषयताकबोधजनकत्वेन प्रतिज्ञासंप्रदायसिद्धा तद्विषय
तावच्छिन्नत्वलिंगविषयत्वाभावो वाच्यः तदा लिंगपदवैयर्थ्यमनतिरिक्तविषयत्वे पूर्वोक्ते पर्यवसानं चेत्यतः पक्षांतरमाह वस्तुत इति लिंगलिंगत्वं
वा प्रमेयमित्यादावव्याप्तेराह तथा चेत्यादि हेतुभूतेत्यादि ह्रदो धूमाभाववान् वन्ह्यभावादित्यत्र यो यो धूमवान् स वह्निमानिति यो यो धूमाभावाभाववा
न् स वन्ह्यभावाभाववान् इति यो यो धूमवान् स वन्ह्यभावाभाववानिति त्रिविधोदाहरणव्याप्त्यन्वयेन लिंगविशेषणानिर्देशः तथा च हेतुभूतो वन्ह्य
भावसत्प्रतियोगितावच्छेदकं वह्नित्वं वन्ह्यभावाभाववत्वं चेति तदवच्छेदेन साध्याभावव्यापकतावगाहिनां त्रयाणामुपग्रहः साध्याभावोपि साध्यमू

२५ 25 तामावप्रतियोगित्वेनैवोपादानमुचितमिति ध्येयं यादृशव्याप्तिविषयताकत्वेन प्रकृतानुमितिकारणत्वं तादृशविषयताशून्यत्वं तु निर्ग
लितार्थः एवं प्रतिपक्षविशेष्यकार्थकमुद्देश्यानुमितिसमानविषयकत्वं नोपादेयमित्याशयेन मूलं योजयति अन्यूनेत्यादि पक्षविशेष्यत्वप्रवे
शो धूमादिस्वत्रहेतुत्वावयवेऽतिव्याप्तिं परिहारयितुमुपक्रमते हेतुत्वमित्यादि पंचम्यंतान्यत्वं पञ्चमेन दंडादिति प्रतिज्ञायामव्यापकमतो हेतुत्वन्यस्य
त्ववेति आवश्यकत्वादिति तथा च हेत्वन्यत्वेनैव सकलहेतुवारणे पक्षविशेष्यकत्वं नोपादेयमिति ननु हेत्वन्यत्वोपादानावश्यकत्वे हेतुत्वमभिधेयं
प्रमेयत्वादिस्वत्रहेतुत्वावयवस्यमाव्याप्तिवीजमिन्नस्तां परं किंतु प्रमेयत्वमभिधेयं प्रमेयत्वादिस्वत्रहेतुत्वावयवस्य तत्र हि पंचम्यर्थहेतुत्वस्य प्रकृतस्य
र्थविशेषणत्वेनान्वयात् पक्षविशेष्यकत्वेन तद्वारणासंभव इत्यतः सुवर्थस्य प्रकृत्यर्थविशेष्यत्वेनान्वयबोधमुपपादयति संख्येत्यादि विशेष
णत्वेनान्वये बाधकमाह प्रातिपदिकेति तथा च पर्वतो वह्निमान् धूमात् पृथिवी भिद्यते गंधादित्यादौ हेतुना विशिष्टस्य हेतोर्वह्न्यभेदेनान्वयो
ऽनुपपन्न इति भावः ननु विभक्त्यर्थसंसर्गेण प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्चान्वयबोधो भवन्नातिप्रसज्यते इत्यत आह चैत्रस्येद
मित्यादि नमैत्रस्येत्यत्र षष्ठ्यर्थसंबंधावच्छिन्नप्रतियोगिताको मैत्राभावो न प्रतीयते षष्ठ्यर्थस्वत्वाभिभावस्य वृत्त्यनियामकत्वात् वृत्त्यनियामक
संसर्गस्य प्रतियोगितानवच्छेदकत्वात् संयोगादिना मैत्राभावस्तु मैत्रधनेऽप्यतिप्रसक्तमिति भावः ननु न चैत्रस्येत्यत्रान्य एवं नञर्थः स एव स्वस्वा
मिभावेन धनेऽन्वेतीत्यत आह द्वयोरिदमिति तथा च चैत्रमैत्रयोरिदं नैनचैत्रस्येति प्रयोगात्प्रसंग इति भावः बाधकांतरमाप्याह नेदमिति। तथा चैकान्य

स्याप्रसिद्ध्याऽसाध्यमिति केनेदमेकस्यापीति प्रयोगो न संभवतीति साध्याशयः वृत्तिनियामकोऽपि संबंधः कुतो न प्रतियोगितावच्छेदक इत्यतो बाधकांतरं स्फु-
चयति चैत्रो नेति नेदं चैत्रस्येत्यादौ चैत्राभावबोधेन भूतले न घट इत्यादाविवानुयोगित्वसम्बन्धापेक्षेति हृदयं ॥ ॥ मिश्रास्तां व्याख्यानमुपन्यस्यन्ति हे-
तुविषयकेति हेतुविषयकज्ञानजनकत्वसमानाधिकरणं प्रतिज्ञात्वमपीत्यतो व्याप्येति हेतुविषयकज्ञानजनकत्वव्याप्यमपि तत्र स्वतिज्ञात्वमि-
त्यवयवतावच्छेदकेति उदाहरणत्वमपि न लिंगविषयकज्ञानजनकत्वनियतमित्युदाहरणान्येति उदासीनवारणाय न्यायावयवेति अत्राहुः अवय-
वतावच्छेदकमिह सकलहेत्ववयवसाधारणहेतुत्वादिकं विवक्षितं मुततत्तल्लिंगकहेतुत्वादिकमाद्येन प्रतस्वप्रकृतलिंगविषयकत्वव्याप्यं लिंगत्व-
स्यैकेवलान्वयितया लिंगपदेन प्रकृतलिंगस्यैवाभिधानात् अंसेगधवत्त्वसाधकप्रतिज्ञात्वमपि लिंगविषयकज्ञानजनकत्वनियतमित्यव्याप्तिताद-
वस्थ्यं अत एवास्वरसादत्र केचिदित्युक्तमिति गोडाः न चेवं तथापि हेतुसाध्यपक्षेषु योयो येन येनावयवेन ग्राह्यस्तद्भेदेनावयवतावच्छेदकं रूपं
मिष्यते गंधवत्त्वसाधकभेदसाध्यकन्यायस्य प्रतिज्ञासाधारणप्रतिज्ञात्वं न प्रकृतहेतुविषयकज्ञानजनकत्वनियतं पृथिवीत्वहेतुकप्रतिज्ञायां तदभावा-
त् प्रकृतपदेन स्वसमभिव्याहृतहेत्ववयवप्रतिपाद्यहेतोरभिधानात् हेत्ववयवत्वं तु हेतुभेदादेव भिन्नं हेतुविषयकज्ञानजनकत्वनियतमुपनयत्वनि-
गमनत्वे अपि नयेति ध्येयं वस्तुतो मिश्रैरपि प्रथमतो लिंगाविषये स्वत्रनजन्यत्वात्सेन लिंगविषयकज्ञानजनकत्वनियतावयवान्यत्वमर्थमु-
क्त्वा पश्चादित एवास्वरसात्तेनोदाहरणाद्यवयवचतुष्टयान्यत्वं पर्यवसितमिति न काप्यनुपपत्तिरिति किं च तः कथितमिति हेत्वाद्यवयवचतुष्टयान्य-

२६ न्यायावयवत्वमेवसमंजसंलक्षणमितिमंतव्यं नन्वुदाहरणेनव्याप्तिरूपनयेनपक्षधर्मताचोपनीतेतितदातदुभयविशिष्टलिंगपराम
र्शान्निगमनेनसाक्षादेवस्वार्थानुमितिहेतुःपरामर्शोजन्यतइत्यनुपपन्नानिसर्वाणिप्राचीनोक्तिलक्षणानीत्यतआहमूलेनिगमनंचे
26 तिपरामर्शःस्वार्थानुमित्युपहितःअबाधितेतिअबाधितःअसत्प्रतिपक्षितत्वज्ञानजनोयत्रतात्पर्यग्रहात्वादितिविग्रहःप्रतिपक्षोविषयःज
नःसमूहःतथाचासद्विषयकत्वसाप्रामाण्यस्यज्ञानसमूहःप्रकृतेनबाधितइति·तज्जनितःपरामर्शःकथंस्वार्थानुमितिमुपदधीत·अप्रामाण्य
शंकायाःस्वार्थानुमितिविरोधित्वादितिभावः जिज्ञासानुपधायकप्रतिज्ञायामव्याप्तिरतआहदीधितौयोग्यतेति·योग्यतानुपूर्वत्वमात्रं·तेनयस्यन्या
यस्यावयवत्वंतन्न्यायीयहेत्ववयवपूर्ववर्तित्वंलभ्यतेऽतोन्यायांतरावयवांतरेतन्न्यायपूर्वोच्चरितेनातिप्रसंगः·लिंगाविषयकेनिमूलं·अत्रमिश्राः
लिंगसाध्यंतद्विषयकंतद्विधेयकंयज्ज्ञानंतज्जनत्वमर्थःपर्वतोवन्हिमानित्यादौवन्हिरेवविधेयोनतुतस्यसंबंधःसंबंधायातयोरभिधानेव
न्हेर्विधानुमशक्यतयातद्विधानार्थमेवतदभिधानात्उदाहरणेतुपर्वतोवन्हिमानित्यादौवन्हिर्नविधेयःकिंतुवन्हिमुद्दिश्यधूमवद्वृत्तित्वंअन्यद्वि
धप्रकारत्वमन्यच्चविधेयत्वमित्थमुपनयस्थापंचपदानुषंगेनसाध्यविधेयकबोधजनकेनिगमनेऽतिव्याप्तिवारणायलिंगाविषयकेतिलिंगा
विषयत्वंतुनिरुक्तलिंगत्वाविषयत्वमितरथापृथिवीभिद्यतेपृथिवीत्वादित्यत्रप्रतिज्ञायामव्याप्तिप्रसंगादितिव्याचक्षुःतत्रान्यस्यप्रकारत्व रम०
मन्यस्यविधेयत्वमसहमानोदीधिकारोयथाश्रुतेगंधवतीभिद्यतेगंधादित्यत्राव्याप्तिप्रसंगात्लिंगाविषयत्वमन्यथाव्याचष्टेपूर्वोपदर्शितार्थ २६

कमिति प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयतावहिर्भावेन लिंगाविषयकेत्यर्थकमित्यर्थः अभावेति ह्रदो निर्धूमो निर्वह्नित्वादित्यत्र यो यो धूमवान्
स वह्निमानित्युदाहरणवारणायेत्यर्थः तेन तद्विशेष्यकत्वपर्यन्तानुसरणेनात्र हेतुसमवायिकारणतावच्छेदिकाया जलत्वजातेः परमाणुवृत्ति
त्वेन व्यभिचारात् तस्य त्यागं तत्राह इदं द्रव्यमिति ननु प्रकृतपक्षे साध्यवैशिष्ट्यविषयतावहिर्भूतत्वेन लिंगाविषयकं यत् तत्साध्यवद्विशेष्यकं ज्ञानं त
ज्जनकन्यायावयवत्वस्य प्रतिज्ञालक्षणत्वे धूमाभाववान् वह्न्यभावादित्यत्र यत्र यत्र धूमस्तत्र तत्र वह्निरित्युदाहरणेऽतिव्याप्तिस्तज्जन्यबोधस्य सा
ध्यवद्धूमादिमुख्यविशेष्यकत्वादतः कस्यान्तरमाह लिंगाविषयेत्यस्येति पूर्वोक्तेति प्रकृतहेतोः प्रकृतसाध्यसिद्ध्योपयिकेत्यर्थः ननु लिंगविषय
त्वं यदि साध्यवद्विशेष्यकत्वं तदा घटोऽभिधेयः प्रमेयत्वादित्यत्र हेत्ववयवेऽतिप्रसंगः हेतुत्वस्यापि साध्यत्वात् अथ साध्यविषयकत्वमात्रं तदा पर्वतो
वह्निमान् वह्निसामग्र्या इत्यत्र हेत्ववयवेऽतिव्याप्तिरतोऽन्यथानिवेक्षि प्रकृतेति हेतुतावच्छेदकावच्छिन्नस्य फलमाह वह्निमानिति हेतुविषयतेत्यस्य
फलमाह अयं हेतुरिति ननु लिंगविषयकेत्यस्य साध्यवत्तावगाहित्वार्थकत्वेऽपि तथाविधहेतुवाक्यासंभवति हेत्ववयवजन्यबोधस्य हेतुत्वा
त्मकसाध्यविशेष्यकत्वादिति हेतुत्वात्वसाधकं न्यायमाह इदं चेति तथा च प्रकृतहेतुप्रकारतानिरूपितहेतुतात्वावच्छिन्नविशेष्यतावहिर्भूतविष
य....ताकत्वमेवात्र लिंगविषयकत्वं साध्यांशाज्ञानं न प्रवेशनीयो वैयर्थ्यात् अत्र हेत्ववयवानां तादृशविषयताकबोधजनकत्वं साम्प्रदायिकं तादृशवि
षयतावहिर्भूतविषयताकत्वमेव लिंगविषयकत्वं वाच्यं अन्यथा पर्वतैको धूमादित्यत्र प्रकृतहेतूपरक्तहेतुत्वविषयतावहिर्भावेनैकत्वग्राहक

स्य — हेत्ववयवस्य दुर्वारतापत्तेः अथैवं यागवान् यागकृतेरित्यादौ यत्नानुकूलतासंसर्गेण यागसंबन्धिनीकृतिरिह हेत्ववयवेनाभिमता तत्र यागानुकू
२७ 27 लाभिन्नकृतित्वेन हेतुप्रयोगेऽतिव्याप्तिश्च इति ध्येयं एतेनेत्यादिमूलं पंचभिरवयवैरेकवाक्यतया जनिते वाक्यार्थबोधे विद्यमानां ज्ञातिमादायावयव
मात्रेऽतिप्रसंगः स्यादित्यत आह कृतकत्वादिति अवयवांतरजन्यज्ञानावृत्तिरूपविशेषज्ञानजनकतावच्छेदिका शाब्दानुग्रहादिशब्दनि
र्वचनानुरोधात् तादृशधर्मवत्त्वं तत्त्वं जातिस्तद्योगिज्ञानजनके शाब्दादिरूपोदासीनवाक्येऽतिव्याप्तिवारणाय वृत्त्यंतं जातिविशेषणं लिंगि
धीर्न्यायजन्यो महावाक्यार्थबोधः तत्परं तज्जनकं वाक्यजन्यज्ञानमवयवजन्यो महावाक्यार्थबोधः तद्वृत्तिरवयवांतरजन्यज्ञानावृत्तिर्या जाति
तद्वाक्यजनकत्वं प्रतिज्ञैकदेशेऽतिव्याप्तमतः शाब्देऽन्त्यस्येति ज्ञानाकारप्रदर्शनं तथा च तथाविधाकारकविजातीयशाब्दत्वावच्छिन्नजनक
त्वं लभ्यते एतन्मते पंचभिरवयवैः पंचवाक्यार्थबोधा विजातीयास्तत्तज्जन्यसंस्कारसहितान्त्यावयवजन्ये विजातीयवाक्यार्थबोधे कारणानीति वा
सना· अथ हेत्वादिचतुरवयवक एव न्याय इति वादी प्रत्यवतिष्ठते नन्विति न साधनांगं न्यायावयवः पक्षः साधनीया कोटिः तस्याः परिग्रहे सम
रोत्र विप्रतिपत्तौ प्रमाणेन हेतुपंचम्या सहाकांक्षायां प्रायम्यात् प्रथममेवाभिधातुं योग्यत्वात् तथा च शब्दो नित्योऽनित्यो वेति विप्रतिपत्त्या अनित्य
त्वादिकोटेः समर्पितां अनित्य इति पदेन सह कृतकत्वादित्यस्याकांक्षा च विद्यते इति प्रथममभिहितेनापि हेतुना विप्रतिपत्तिवाक्यसहकृतेनाभिम राम०
तबोधनिर्वाहाद्दलं प्रतिज्ञयेति भावः विप्रतिपत्तिघटकहेतुसाकांक्षपदजनितापदार्थोपस्थितेरेव नातीसाहनेत्यादि आकांक्षायां नियोगे प्रति २७

वादिविप्रतिपत्त्यात तन्नियोगेन एवं च विप्रतिपत्तिवाक्यजनितपदार्थोपस्थितिः सम यथैवं धेन परं नियोगेन चांतरितेति पदजन्यपदार्थोपस्थि
त्यभावान्न प्रतिज्ञां विनाभिमतबोधनिर्वाह इति भावः इत्थं पदजन्यपदार्थोपस्थित्यभावान्न प्रतिज्ञया विनाभिमतबोधनिर्वाह इत्यत्र यद्यपि विप्रति
पत्तिवाक्यघटकं पदं हेतुनापि सहसाकांक्षमपि न भवतीत्याह विप्रतिपत्तिवाक्यस्येति पक्षपरिग्रहो नित्यत्वतदभावादिकोटिकः संशयः तत्सर्ववत्ति
त्वेन निराकांक्षत्वादिति हेत्ववयवेनेति शेषः शब्दो नित्यो न वेति विप्रतिपत्तिवाक्ये नित्यत्वतदभावाभावोपदार्थविषया वाक्यार्थविषया चोपस्थितो
वाक्यार्थसंदेहे विषयतयान्वितो संदेहस्तु शब्दान्वयीति नित्यत्वतदभावाभावकोटिकसंशयविषयः शब्द इत्यन्वयबोधः तत्र हेत्ववयवार्थस्तु हेतुकत्वं
न वाक्यार्थान्वेतिवाधात् नापि नित्यपदार्थे नित्यत्वाने विप्रतिपत्तिस्थनित्यशब्दस्य ज्ञानलाक्षणिकत्वाभावात् अन्यथा तस्य विषयतया संदेहे हेत्वन्वयो
न स्यात् यदा तु भिन्नाः प्रतिज्ञासाधनांगमेव विप्रतिपत्तेः साध्यपरतया हेतुत्वेऽनाकांक्षितत्वेन ततः प्रतिज्ञाफलानिर्वाहादिति नापि ज्ञापकत्वं ज्ञाप्य
त्वं वा हेत्वर्थ इति मतेऽपि संदेहविशेष्यतानित्यादिपदार्थे तद्वयोपपयिकाकांक्षा अन्यथा धूमात् पर्वतो वह्निमानित्येवसादिवाक्यस्यापि योग्यतापत्तेरिति
भावः अथ नवापदविनाकृतस्य शब्दो नित्य इति भागस्य पुनरनुसंधानान्नजन्मितपदार्थोपस्थितिस्तत्र हेत्ववयवेन सहाकांक्षा च संभवतीत्यत आह
आहत्नो त्विति · न चावयवचांतरादिति उदाहरणात् साध्यं प्रतीयमानमपि न पक्षतावच्छेदकावच्छेदेनान्वेतीति किंतु हेतुमत्तावच्छेदेन निगमनात् पुनः रूप
नयस्था यं परानुषंगतः पक्षे प्रतीयमानमपि साध्यं न हेत्ववयवयोग्यं तस्मादित्यनेनावरुद्धत्वादिति भावः आप्तेपादिति हेत्ववयवयोग्यसाध्योपस्थि

२८ 28

तिरिस्य नुपपद्यते तथा चोदाहरणोपनयाभ्यां साध्यवान् पक्ष आक्षिप्यते तत्र हेत्ववयवार्थान्वयप्रसङ्गाशंकि तु ताशयः साध्यान्वये· साध्यहेत्वोर्व्याप्यज्ञा
पकभावान्वये· तदभिधानं· उदाहरणाद्यभिधानं· हेतोः साध्यज्ञापकत्वोपपादकतया त्युदाहरणोपनययोः प्रयोग इति भावः तस्मादिति गौरव
धानेनारोजाते वैधनकर्मत्वप्रतीत्यनुपपत्त्या व्यक्तिराक्षिप्यते न चेह तथा वह्निमत्पर्वताक्षेपं विनाप्युदाहरणवाक्यार्थबोधनिष्पत्तेः पीनो देवद
त्तो दिवा न भुंक्ते इत्यादौ दिवसाभोजिनः पीनत्वप्रतीत्यनुपपत्त्या रात्रिभोजनं विनाऽनुपपन्नमिति तदाक्षिप्यते न चेह तथा वह्निमत्पर्वतं विना धूमव
त्त्वावच्छेदे न वह्निमत्त्व उदाहरणवाक्यार्थस्यानुपपत्तिविरहात् यद्यप्युपनयवाक्यार्थो धूमवान् पर्वतः पर्वते वह्निमत्तामंतराऽनुपपन्न इति तदा
क्षेपेक्षमते तथापि न चरादिवाक्यादनुपस्थितमपि प्रयोज्यतयाऽन्वेत्यतिप्रसंगादिति पूर्वोक्ते निर्भरः अन्ये तु साप्य तदतं भवादि स्यात एक एव सं
दर्भः अत एव मिश्रैरन्येषां मते शाब्दानिसत्वे प्रमाणं वदेति वाक्यं साध्यविशेषितपक्षसाध्योपलक्षितस्य वा साधनस्याभिधाने नियोग इति निर्द्धारयितुं
शक्यते इत्यस्वरसमुद्भाव्य ततः पूर्वोक्तयुक्तिमुपसंहरति तस्मादिति तीत्यवतारितं॥ ॥साध्यनिर्देशानंतरमिति कुत इति पंचम्यंतमात्रोपलक्षकं
श्याकांक्षासमयः अनाकांक्षिताभिधाने· समयमतिक्रम्याभिधाने लोकेपि तथैव साध्यं निर्दिश्य हेतुरुपन्यस्यत इत्येवमाकांक्षायाः समयस्य निवृत्ति
रुत्सर्गः तथा च प्रतिज्ञानंतरं हेतुरभिधेय इति लोके शास्त्रे च समयबंधात् साध्यनिर्देशानंतरं हेतूपन्यास इति निगर्वः एतेनावयवविच्छेदेनादिनो
मध्यस्थस्य वासर्वत्रक्तृत्व इत्याकांक्षानियमे प्रमाणाभावः कस्यचिदन्यत्रैवाकांक्षारं भवान् न प्रतिज्ञावाक्येन सह हेतुवाक्यस्य संगतिप्रदर्शनमि

दमित्यसांप्रतं संगतेर्वाक्यैकवाक्यतानिःपादकतया पदैकवाक्यतापन्ने तदुपदर्शनानौचित्यादत एवोपनयानंतरं निगमनमिति संगतिप्रदर्श
नविनाकृतमेव निगमनावतरणमग्रिमग्रंथयत्नो। अन्वयप्रतिज्ञाभावयोरिति संगतिप्रदर्शनप्रसंगादित्यादि समाहितं जनकांतस्याप्यांत
गतित्वपरत्वे तस्मादितिनिगमनेकदेशोऽतिव्याप्तिर्नेच तदुद्देश्ये न साध्यव्याप्यहेतोः परामर्शात् साध्याविषयकत्वदले नैव तस्य वारणमिति मिश्रो
क्तं प्रकृतं धूमाभाववान्वन्ह्यभाववान् यो यो धूमवान् स वन्हिमान् धूमव्यापकवन्ह्यभाववानयं तस्मात् धूमाभाववानिति न्याये तस्मादिति तदुद्देश्ये न धू
मव्यापकवन्ह्यभाववत्त्वे नैव हेतोः परामर्शात् तस्मादित्यस्य साध्याविषयकशाब्दजनकत्वसंभवादतो दीधितौ न्यायावयवार्थकमिति प्रकृतेति हेत्ववयवानां
यादृशयादृशविषयताकबोधजनकत्वेन संप्रदायसिद्धत्वं तादृशविषयताबहिर्भूतसाध्यविषयताशून्यत्वं साध्याविषयकत्वमित्यर्थः तेनानुकूलता
संसर्गेणापागवत्त्वमिति हेतुके चैत्रो पागवान् पागकृतेरित्यादौ नाव्याप्तिः साध्यपदोपादानं तु विभक्तिमत्त्वदलसार्थक्याय अन्यथा प्रकृतहेतुप्रकारक
हेतुत्वविषयताबहिर्भूतविषयताशून्यत्वदलेनैवावयवांतरवारणे तस्य वैयर्थ्यप्रसंगात् इत एवास्वरसाद्वा द्वैप्रदर्शितेति यादृशसाध्यविषयताकत्वे
न प्रतिज्ञाः संप्रदायसिद्धास्तादृशविषयताशून्यत्वस्वरूपं पक्षविशेषणत्वेन साध्याविषयकत्वं वाच्यमित्यर्थः प्रतिज्ञा क्वचित् साक्षादेव पक्षे साध्यं ग
ह्णाति यथा चैत्रः पचति घटोनेतराणीत्यादौ क्वचित्पदार्थमंतराकृत्वा यथा पर्वतो वह्निमान् पृथिवीतरेभ्यो भिद्यते इत्यादौ तथा च नानाविधविषय
तानामनुगमनाय द्वैप्रदर्शितः प्रकारः आश्रयणीय इत्यावेदयितुं साक्षात्परंपरया वेत्युक्तं निगमनं पुनरुपनयपश्चात्यं प्रदानुषंगेन प्रतिज्ञातुल्यविष

२९ यतावबोधजनकमितिभावः॥ ॥परेतुहेत्वोपदर्शितेतिपक्षविशेषणत्वेनलिंगविषयकत्वमित्याशंकायांसूचितेत्यर्थः तथाचप्रकृतपक्षवि
29 शेष्यतयासाक्षात्परंपरयावानिरूपितायासाध्यविशेषणतायातच्छून्यज्ञानजनकत्वंवाच्यमित्याशयइत्याहुः हृदोधूमाभाववान्वन्ह्यभावादित्यादौ
योयोधूमवान्सवन्हिमानित्युदाहरणंयथाश्रुतेनापिहेतुविभक्तिमत्वेनवाऽपितुंशक्यतेइति विवक्षाप्रयोजनमाहइदंनेत्यादि हेतुविभक्ति
विद्विधाकारकार्थोज्ञापकार्था चयथासंस्त्वंतयोर्निदर्शनमिदंउदाहरणस्येति तथाचेदंनदंडाज्जातंदंडसंयोगाजन्यद्रव्यत्वात्यन्नदंडाज्जातंतन्नदंड
संयोगाजन्यद्रव्यंनभवतीत्युदाहरणेऽव्याप्यत्वेएवंसाध्याविषयकबोधजनकत्वंयथाश्रुतहेतुविभक्तिमत्वंचवर्त्ततइतिहेतुविभक्तौप्रकृतसाध्या
न्वयबोधनक्षमत्वार्थोव्याप्यापकत्वेविशेषणमावश्यकं एवंयोधूमालोकवान्सआर्द्रेंधनवानित्युदाहरणेज्ञापकत्वार्थकहेतुविभक्तिमत्वेनापि
नप्रतिकारइतितथाविवक्षावश्यकीतिभावः उदाहरणस्येत्युपलक्षणंधूमावानालोकव्यापकार्द्रेंधनाभाववानयमित्युपनयातिव्याप्तिवारणम
पितादृशविवक्षाप्रयोजनमितिध्येयं॥ ॥विभक्तिमत्वविशेषणप्रवेशप्रयोजनमाह हेतुत्वपक्ष इति हेतुत्वंतशुणोजात्यभावात्यो गुणःसाजा
तिमान्गुणत्वव्यापकजात्यभाववानयमित्युपनयस्थापंपदस्य तस्मान्नगुणइतिनिगमनोपस्थितसाध्यान्वयबोधनक्षमत्वायोग्यव्याप्यापकत्व
हेतुत्वार्थकत्वयोः सत्वात्तद्रूपनयेसाध्याविषयकबुद्धिजनकेऽतिव्याप्तेर्वारणायविभक्तिमत्वप्रवेशआवश्यकइतिभावः तदर्थस्त्वित्यादि राम०
घटोननिषेधः सत्वात्यायोनिषेधःसनसन्यथावाच्यत्वादभावइतिव्यतिरेक्युदाहरणस्यसाध्याविषयकप्रतीतिजनकत्वमभावस्वरूपसाध्या २९

न्वितस्वार्थबोधकहेतुविभक्तिमत्त्वं चास्ति तिन्नत्रातिव्याप्तिवारणाय साध्ये प्रकृतेति यथा भावत्वान्निषेधत्वाभाववदिति दृष्टान्तं नदुदाहरणं तु पुनः स्वांप्र
दायिकमेकत्र साध्ये हेतुद्वयोपन्यासो नैकन्यायगोचर इति नियमात् अव्यवहितोत्तरं तथा· तथापि साध्याविषयकत्वदले नैव तद्वारणीयं· यं· प्रकृतहेतुवि
शिष्टहेतुत्वविषयतावच्छिन्नं तत्साध्यविषयताकबोधजनकत्वात् पूर्वोपदर्शितेत्यादिद्वितीयकल्पे तु वक्ष्यमाणोदाहरणान्यत्वप्रवेशानमेव शार
णं अत एव हेत्वितिसंपातायातमित्यभिहितं अन्यथास्मिन्नेव व्यतिरेक्युदाहरणे यदि यथा निषेधत्वाभाववदिति दृष्टान्तस्तदा साध्यान्वितैकत्वस्य
प स्वार्थोपस्थापकप्रथमाविभक्तिमतीति तत्रोदाहरणेऽतिव्याप्तिवारणाय हेतुपदप्रवेशावश्यकत्वप्रसंगात् तज्जन्यबोधे प्रतिज्ञानुसविषयकत्वस्य
साक्षात्परंपरया वा पक्षविशेषणतापन्नसाध्यविषयकत्वस्य चाभावसत्त्वात् यदि चेत्यादि पर्वतः पर्वतभिन्नत्वप्रकारकनिर्णयविशेष्याभाववत्त्वात् तथावि
धाभावात् योयः पर्वतः भिन्नत्वप्रकारकनिर्णयवान् स तथाविधनिर्णयवान् यथा पर्वतभिन्नत्वप्रकारकनिर्णयाभावादुत्पन्नं ज्ञानमिति व्यतिरेक्युदाहरणा
स्य साध्यान्वितस्वार्थबोधकहेतुविभक्तिमत्त्वं तज्जन्यबोधस्य· प्रकृतविशिष्टहेतुत्वविषयतावच्छिन्नतत्साध्यविषयताविरहस्य वर्त्ततेइसति व्याप्तिः यदि च
हेतुविभक्तिज्ञाप्यत्वबोधिकैव प्रकृते उपादीयते तदापि तादृशनिर्णयाभावादात्मकयाभाववदिति दृष्टान्तवत् उदाहरणेऽतिव्याप्तिर्दुर्वारा न च साध्यविशे
ष्यकान्वयबोधजनकसमस्वार्थोपस्थितिजनकत्वं हेतुविभक्तौ विशेषणमुपादीयतामियं तु न तथेति वाच्यं साध्यान्वितस्वार्थबोधकेदं पदशालिन्युपन
येऽतिव्याप्तिवारकत्वेनोपात्तस्य विभक्तिपदस्यैव वैयर्थ्यप्रसंगात् न च हेतुत्वं न गुणाद्यात्मकत्वादिन्यायेन गुणत्वव्यापकजात्यभाववदिति तस्मान्न गुणत्वमिति हेतुसा

३०
30

ध्यप्रधानकोपनयनिगमनाभिप्रायेण हेतुत्वप्रकाशकइत्यादिग्रंथइतिवाच्यं तादृशप्रयोगस्याभिप्रेः कंठतोनिराकरणात् तत्रनिगमनोपात्तेनसाध्ये
नसहेदंपदसमभिव्याहृतसमर्थ्यस्यैवान्वयादिदंपदार्थस्यसाध्यसान्वयायोगात् एवमपिपूर्वोपदर्शितेसादिद्वितीयकल्पेयथापर्वतभिन्नभेदा
न्नथाविधनिर्णयाभावाइतिदृष्टांतवल्कदाहरणेऽतिव्याप्तेर्वज्रलेपत्वाचेतिसमुदायार्थः भिन्नसाधयित्वयाप्यायप्रयोगःसविवादइतियदिचेत्युक्तं
पक्षाप्रकृतहेतुविशिष्टहेतुत्वविषयतावह्निमूर्त्तातदव्यापिकाहेतुर्विशिष्टहेतुत्ववैशिष्ट्यविषयतेतिविशिष्टविषयताघटकसाध्यविषयताशून्यबो
धजनकत्वाभावादेवनिरुक्तोदाहरणांवारणीयमितियदिचेत्युक्तंअन्वयवंतरेति यद्यपिनयवंतरेणप्रतिज्ञाहीनापितादृशनिर्णयाभावउपपत्त्यापि
नइतितद्दोषतादवस्थ्यं तथाचयवांतरघटकपदसाकांक्षविभक्तिमत्वेतात्पर्यं लाघवादाहरणान्यत्वेनवेतच्चिंत्यमिति तादृशरूपांतरपरिच
यएवचिंतावीजं यथाश्रुतनिगमनेव्याप्तिप्रसक्तमतोयाचष्टे विभक्त्यर्थेति विभक्तिप्रयोज्यहेतुत्वमुख्यविशेष्यताकबोधजनकन्यायावयवत्वम
र्थः हेतुत्वंप्रमेयमित्यादिवाक्येहेतुत्वनिष्ठमुख्यविशेष्यतानविभक्तेःकिंतुप्रातिपदिकप्रयोज्येतिभावः इदंहेतुत्वमिति तादात्म्येनहेतुत्वसा
ध्यकन्यायेतस्माद्धेतुत्वमितिनिगमनेहेतुत्वमुख्यविशेष्यतानविभक्तिप्रयोज्याकिंतुप्रकारांतरेणेवातत्तत्रनातिव्याप्तिःनदृष्टत्तेरित्यादितादात्म्यमिवव्य दा
त्यनियामकसंबंधेनव्यापकत्वंनाप्रपेयतइत्यर्थः गगनादेर्मूर्त्तत्वव्यापकताव्यवमेवस्वीकृतत्वान्नाप्यत्वंपंचम्यर्थइतिमतेचत्वनियामकोपिसं दा॰म॰
बंधोव्यापकतावच्छेदकःसंभवतीत्यतआह संप्रदायेति पुवर्थपुवर्थोन्वयेपुसन्निविदिहमभिसंदधनाःसाप्रदायिकाःसाध्येहेतुत्वन्वयानुप ३०

पत्साधकत्वे दण्डादित्वादिनापक्षेवनाङ्गीकुर्वीतइतिभावः उदाहरणेत्यादिमूलमुदाहरणंव्याप्यव्यापकभावप्रतिपादकंतस्यत्रप्रश्नवाक्यादिकमेतामयो
जिकाकुत्थमस्यज्ञापकत्वमित्युपपादकजिज्ञासातज्जनकोधूमोज्ञापकइत्युपपाद्यशाब्दबोधस्तज्जनकोन्यायावयवोहेतुरित्यर्थः अत्रजनकतास्वरूप
योग्यता· तेनोदाहरणाविनाकृतस्यासाधकतासाधकन्यायस्यहेत्ववयवेनातिव्याप्तिरितिमिश्राः अत्रासाधकतासाधकोपिपञ्चावयवन्तकएवन्यायोयो
ग्यताचरूपान्तरपरिचयेदुर्ग्रहेतिमिश्रव्याख्यायामनुशयानोभट्टाचार्योमिश्रोक्तस्यैवजनकान्तार्थस्यपोपपत्त्यस्यपूर्ववर्त्तित्वमात्रमर्थइतिमेने· दीधितौयो
ग्यतासत्वादुदाहरणाव्यवहितपूर्वत्वसत्वात्तथाचोदाहरणाव्यवहितपूर्ववर्त्तिन्यायावयवत्वंलक्षणार्थइतिभावः अनुक्तेतिअनुक्तमनुक्तोपनयनिगम
नकंयदुदाहरणंव्याप्तिप्रदर्शकंवाक्यंतत्पूर्ववर्त्तिनिवाकेऽतिव्याप्तिवारणायन्यायावयवत्वंदेयं· ननुतदुदाहरणमेवनभवतीत्यतआह·उदाहरणत्वं
चेतिवस्तुतोप्रपद्यद्वरकव्याप्तिप्रदर्शकवाक्यपूर्ववर्त्तित्वंतन्न्यायावयवत्वंहेतुत्वंवाच्यमेव· नचैवमन्यान्तरीयोदाहरणाव्यवहितपूर्ववर्त्तिन्यायान्तरीयनिगम
नादावप्यतिव्याप्तिप्रसङ्गादितिध्येयं॥ ॥साध्याविषयकेतिमूलमत्रानुमितिपरामर्शहेतुत्वंन्यायावयवत्वं· साध्याविषयकेत्यस्यानन्वयबोधजनकत्वेनान्वे
तितेनसाध्यविषयज्ञानाजनकन्यायावयवत्वंहेतुपञ्चकमन्तन्न्यायावयवत्वंचेतिलक्षणद्वयं· साध्योविधेयस्तद्विषयकत्वंविधेयताख्यविषयताशालि
त्वमितियावत् हेत्ववयवेविभक्तंतद्वयाभावात् उद्देश्यविधेयभावेनान्वयबोधेनसंभवतिव्यत्ययार्थमुद्देश्यचप्रसक्तस्यार्थोनविधीयतइति जन्यत्वेसति
सत्वादित्याद्याहुरुद्देश्यविधेयभावेनान्वयबोधेस्वार्थकचित्संभवेपितद्विधेयकज्ञानजनकत्वनियतावयवतावच्छेदकधर्मशून्यत्वंवक्तव्यमितिनाव्याप्तिः अ

३१ तएवालोके साध्यज्ञानाजनकत्वेन तज्ज्ञानजनकत्वाभिप्रायकत्वमुक्तमित्युक्तं हेतुपंचम्यंतेत्यत्र द्वंद्वगर्भो बहुव्रीहिः हेतुश्च पंचमी च हेतुपंचम्यौ त
योरंतो विश्रामो यत्रेत्यर्थः पंचमीतदर्थः तेन हेतुतावच्छेदकावच्छिन्नविशिष्टहेतुत्वविषयताया हि भूतविषयताशून्यज्ञानजनकत्वाभावयवत्वं द्विती
31 यलक्षणार्थ इति मिश्रानुसारिणः यथाश्रुतसाध्याविषयकत्वस्य पर्वतो वह्निमान् वह्निसामग्र्या इत्यादाववाक्ये शाहव्याप्त्यात्मार्थमिति प्रकृतहेतुविशि
ष्टहेतुत्वविषयतावद्धिर्मावेन साध्याविषयकत्वार्थकमित्यर्थः उपनयविशेषस्येति हृदो धूमाभाववान् वह्न्यभावादित्यत्र धूमव्यापकवह्न्यभाव
वानयमित्याकारकस्येति शेषः उपलक्षणमिदं तत्रैव यो धूमवान् स वह्निमानित्युदाहरणस्यापि आवृत्तिरस्य फलमिति ध्येयं वैकल्पिकमिति हेतु
वाचकपदांतरानुमितिपरशाब्दत्वं पंचम्यंतानुमितिशाब्दत्वं चेति लक्षणोत्तरदलद्वयमन्यतरस्मादिति भावः ननु प्रथमलक्षणे हेतुत्वं धूमाभाववद्व
ह्न्यभावात् यो यो धूमवान् स वह्निमान् धूमव्यापकवह्न्यभाववदित्यत्रोपनये साध्यानवगाहिनि हेतुत्ववाचकेपदं पदांतेति व्याप्तिरत आह उपनयस्य
चेति प्रथमे वेति तथा चांतत्वमानुसंधानिकं न तूच्चारिकमिति भावः द्वितीयलक्षणेऽतिप्रसंगनिरासाय एवं वह्न्यादिति दृष्टांतस्येति प्रथमेवांतर इति
पूर्वेणान्वयः अन्यथा घटो न शाब्दो गुणात्वात्पटवत् यः स गुणो यथा रूपादिति स्वपरदृष्टांतकोदाहरणेऽतिप्रसंगादिति भावः उभयत्रांते प्रथमानुसंधान एम॰
बीजमाह पंचम्यंतत्वे इति नामार्थयोस्तादात्म्येनान्वयेनाग्रांसमानविभक्तिकत्वप्रतिसंधानस्यतंत्रत्वादिति भावः कस्यचिदिति अत्रैव न्याये यथाश्रुतः ३१
परत्वादिति परत्वज्ञापकशक्तिमद्दृष्टांतकमुदाहरणं पंचम्यंतं संभवतीत्याशयः पूर्ववदिति उदाहरणान्यत्वप्रवेशेनेत्यर्थः अत्र चेति पंचम्युत्तर

सार्थकपदाघटितत्वे सति पंचमीघटितत्वं पंचम्यंतत्वं वा वाच्यमित्याशयः पंचम्यादेरित्यादिपदाभ्यां समभ्यंतादेरुपग्रहः नयेत्यस्मिन्नेनास्य र
सः स्त्रूचितः तथा हि पंचम्यंतादेव तसिलं विधाय तसिलंतस्य तद्धितांतत्वेन प्रातिपदिकसंज्ञायां सुपो धातुप्रातिपदिकयोरिति पंचमी लुप्यते न तु तसि
लः पंचम्यादेशत्वं तथा सति प्यमादेशेन तसिलपरे सर्वस्य इत्यनेनैव सर्वतः इत्यत्राप्येकारप्रसंगात् स्त्रीलिंगसर्वशब्दात्परं तस्तसिलि सर्वतः इति प्रयोगाना
पत्तेः सर्वनाम्नो वृत्तिमात्रे पुंवद्भावेपि विभक्तिमुपजीव्य पुंवद्भावाप्रवृत्तेः भवतु वा तसिलपंचम्यादेशः तथापि अर्थवद्भागस्य हेतुपंचम्यंतत्वेन विवक्षणीय
मित्यर्थात तसिलंतस्य कृत्तद्धितसमासाश्चेत्यनेन प्रातिपदिकसंज्ञायां सुब्लुक्त्वे तस्यामानुसंधानिकप्रथमांतत्वेन पंचम्यंतत्वाभावादिति दिक् पूर्ववदिति
साध्यतावच्छेदकावच्छिन्नविशेष्यकप्रकृतहेतुविशिष्टहेतुत्वप्रकारकबोधजनकपदघटितत्वमित्यर्थः तेन धूमादालोकवान् पर्वतो वह्निमान् धूमात् आ
लोकाद्वह्निमतस्सधर्मा पर्वतो वह्निमान् धूमात् धूमसमानकालीनवह्निमतः सधर्मा पर्वतो वह्निमान् धूमादित्यादौ प्रतिज्ञायां नातिव्याप्तिः धूमाद्वह्निमतः स
धर्मा पर्वतो वह्निमान् धूमादित्यादिकः प्रयोगो नाभ्युपेय इति भावः तस्माद्वह्निमानिति निगमनेऽतिव्याप्तिवारणाय साध्याविषयकज्ञानजनकत्वं विशेषणं
तच्च वह्निमान् वह्निसामग्र्या इत्यत्रातिव्याप्तमतो न्यूनजनकपदस्याकांक्षापदत्वेन व्याचष्टे इतरेत्यादिप्रतिज्ञास्य हकारेणाहेत्ववयवस्थापितथाविधबोधजन
कत्वात् असंभववारणाये नरनैरपेक्ष्येणेति साध्यांशेति ।। तथा च नैरपेक्ष्येण प्रकृतहेतुविशिष्टहेतुत्ववैशिष्ट्यावगाहिज्ञानाजनकत्वमात्रं प्रकृते प्रवेश
नीयं पर्वतो धूमवत्त्वाद्वह्निमान् वह्निसामग्र्या इत्यादावतिव्याप्तिवारणाय हेतुत्वप्रकृतहेतुविशिष्टत्वं विशेषणमिति भावः मूले प्रतिज्ञेत्यादि प्रतिज्ञावाक्यजन्यत्वं

३२ यद्धीस्वरूपे जन्ये कारणाकांक्षानिवर्तकं ज्ञानं तज्जनकं जनकांतार्थधीः साध्यविषयिणीऽकारणाकांक्षाप्रकृतहेतुज्ञानजन्यत्वसंदेहः तथा च प्रतिज्ञा
32 वाक्यजन्यमनत्साध्यज्ञानं हेतुज्ञानकारणकं न वेत्याकारकः संशयनिवर्तकं ज्ञानं तज्जनकत्वे सतीति निगर्वः निगमनमपि तादृशसंशयनिवर्तकमिति
प्रतिज्ञाजन्यत्वं ज्ञाने विशेषणं प्रतिज्ञानिगमनाभ्यां संभूय जनितं समूहालंबनमादाय निगमनेऽतिव्याप्तिवारणाय तादृशसंशयनिवर्तकत्वविशेषणं
न च साध्याधारणां तदन्यव्याप्तिपक्षधर्मतादिसंशयानिवर्तकत्वं पर्यवसितमिति हेतुत्वाप्यसाध्यवत्त्वमृ इति विषयतावहिर्भूतविषयताशून्यज्ञानजनक
त्वं निष्कृष्टार्थः तच्च प्रतिज्ञायामपि गतमतो हेतुविभक्तिमदिति प्रकृतसाध्यान्वितार्थकहेतुविभक्तिघटितत्वं तदर्थस्तेन धूमादालोकवान् पर्वतो वह्निमा
निति प्रतिज्ञाउदासः उदासीनवाक्येऽतिव्याप्तिवारणाय वाक्यत्वमिति न्यायावयवत्वमित्यर्थः तेन प्रकृतहेतुकप्रकृतसाध्यकप्रकृतपक्षविषयताव
हिर्भूतविषयताशून्यज्ञानजनकत्वे सति प्रकृतसाध्यान्वितार्थकत्वे तु विभक्तिघटितन्यायावयवत्वमिति संमुदितार्थः दीधितौ लक्षणद्वयांतर्गतमनुमितिप
रवाक्यत्वं व्याचष्टे अवयवत्वमिति ननु लाङ्गुलिकपदवदनुमितिपरवाक्यत्वमित्येव साधुं कृतं लाङ्गुलिकपदे पंचम्यंतत्वविशेषणेन प्रतिज्ञायां कस्या
पि पदस्य लाङ्गुलिकत्वाभावात् भावे वा प्रकृतपक्षान्वितप्रकृतसाध्यान्वितस्वार्थकत्वेन वक्ष्यमाणेन तद्वारणात् निगमने च न लाङ्गुलिकं किमपि पदं सर्वना
म्नो लक्षणाविरहात् पंचम्याश्च हेतुताशक्तेरनुशासनिकत्वात् इत्यतः पंचम्यां एव हेतुत्वे निरूढलक्षणा सूचकमनुशासनमिति व्यवस्थापयति हेतुत्वा गम०
दावित्यादिना वदन्नीसंज्ञेन लाङ्गुलिकीति हेतुताया गुरुत्वेन तत्र शक्तेर्ग्राहकमनुशासनमपि तु निरूढलक्षणायेति भावः कस्य श्रावस्य संबंधः सूत्रेणानु ३२

षिष्यत इत्याकांक्षायामाह लाघवेनेत्यादि लाघवमखंडस्यावधितात्वादेः शक्यतावछेदकत्वे अवधित्वे शक्तिग्राहकं तु पंचमी विभक्ते इति सूत्रमिति भावः
वृक्षाद्विभजते न स्वस्मादित्यादौ नञर्थस्यान्वयोपपादनायावधिमत्त्वेवेति अवधित्वावच्छिन्नमत्त्वेद्वावप्यखंडौ धर्मावधि रवधिरमानित्यनुगताकारप्रती
तिसाक्षिकौ न तु तयोरेकतरोपि विनिगमनाविरहादित्याशयेनाह इच्यनिष्टमिति अतिरिक्तः संबंधिद्वयात् अन्यदेतदिति अवधित्वादिकं त्वखंड एव धर्मोऽनु
पस्थालाघवेनातिरिक्तेऽनतिरिक्ते वावधित्वादौ शक्तिरित्यर्थः व्यवहारः शाब्दबोधः हेतुत्वादावित्यनुषज्यते· तथा चावधित्वरूपशक्यसंबंधो यदा न गृहीतस्तदा
शक्तिग्रहो हेतुत्वादिशाब्दबोधजनको भ्रम एवेति न ततो वस्तुसिद्धिरिति भावः मतांतरमाह वृक्षादपेतीत्यादि विभागावच्छिन्नक्रियैव चेदपेतः शक्यात्तथा सत्य
ह पततीति विभागे शक्तिरिति अपादाने पंचमीत्यनुशासनसिद्धेति शेषः विभागस्य शक्यत्वे वृक्षात्पततीत्यादौ जनकतासंसर्गावच्छिन्नप्रतियोगिताकविभा
गाभाव एव नञा क्रियायां प्रतिपाद्यते न चेदं संभवति जनकत्वस्य वृत्त्यनियामकप्रतियोगितानवच्छेदकत्वादिति वृक्षात्पततीत्यादौ विभागजनकत्वमेव पंचम्य
र्थस्तत्रैव गौरवात् लक्षणैवेत्यस्वरसात् वदन्तीत्युक्तं अत इति पक्षविशेषणासाध्यान्वितार्थकत्वाल्लाक्षणिकपंचमीपदवतो निगमनस्य वारणायेत्यर्थः इदमापा
नतः पद्यवधितात्वमवधिमत्तात्वं चाखंडं तदा किमपराद्धं हेतुत्वलहेतुमत्ताभ्यां यदि च वृक्षात्पततीत्यादौ विभागः शक्यस्तदा धूमाद्वह्निरित्यादौ ज्ञानं प
चम्याः शक्यमित्यपि सुवचं तथा ज्ञाने जन्यतया धूमपदार्थस्य धूमज्ञानस्यान्वयो ज्ञानस्य पंचम्यर्थस्य तु विषयतया वह्नावित्यनेन सर्वसामंजस्यादिति ध्येयं ननु
पंचम्यंतपदोपादानेपि निगमनवारणं धूमशक्यस्य धूमज्ञानलाक्षणिकस्य पंचम्यंतस्य तच्छब्दस्य सत्वादित्यत आह तत्पदे चेति तत्पदस्य धूमे ज्ञाने च शक्ता

३३ द्वयोरुपस्थितयोः परस्परान्वयेन धूमज्ञानलाभात् लक्षणानावश्यकीति भावः यदि च तेजस्वी उष्मादिति न्याये तस्मात्तेजस्वीति निगमने ऽतिव्याप्तिरुक्त
गुणावच्छिन्नस्य गुरुत्वात् तत्सदसो लघुत्वात् एव शक्तिः उक्तगुणावच्छिन्ना वृत्तिलाक्षणिकत्वादिति विभाव्यते तदा पंचम्यंतलाक्षणिके तस्मिन्नेन पंचम्यर्थान्वित
33 लक्ष्यार्थकत्वं वाच्यं न च पंचम्यर्थान्वयिज्ञानं तच्छूलक्ष्यमिति तेनातिव्याप्तिः तस्मादित्यादिलाकारे यदि हेतुत्ववयवः स्यात् तदा तस्य लाक्षणिके पंचम्यन्त
त्वाभावात् अव्याप्तिः स्यादिति तन्निवेधनिपर्वतइत्यादिसंपदायेति साधारणशब्देन कथायां हेतुप्रयोगो नास्ति अविज्ञातार्थकनिग्रहस्थानापात
दित्याशयः मिश्रास्तु यदवच्छेदेन लाक्षणिकपदवृत्तानियमस्तथाविधावयवविभाजकोपाधिमत्त्वं उत्तरदलार्थः तावन्मात्रं लाक्षणिकसाध्यवाचकप
दवत्त्वं प्रतिज्ञायामतिव्याप्तमतः पंचम्यंतेति लाक्षणिकपदे विशेषणमित्याहुः तन्मते कदेशमुपन्यस्यति यत्त्विदादिज्ञानलक्षणेति ज्ञानं लक्ष्यं व
न्हिः शक्यइति तयोः परस्परान्वयात् ज्ञाप्यमानवह्निलाभः ज्ञाप्यमानत्वविशिष्टवह्नेर्वा लक्षणा पदार्थैकदेशो ज्ञाने हेतुपंचम्यर्थान्वय इति भावः पंचम्या
इति उक्तयुक्त्या हेतुत्वे ऽपि पंचमी लाक्षणिकीति तस्या ज्ञापकत्वे शाचां ज्ञाप्यते न वीनानां मते न लक्षणयैवाभिमतार्थबोधे किं साध्यपदे लक्षणयेति भा
वः ननु हेतुत्वे निरूढलक्षणानुशासनिकी ननु ज्ञापकत्वे न चानुशासनात् विभक्तीनां वृत्तिरभ्युपेयते यदा अभिप्रायः न च ज्ञापकत्वं पंचम्यर्थः समभिव्याहृ राम·
तज्ञानं प्रति हेतुत्वेन ज्ञापकप्रसयोपपत्तेः पंचम्यर्थभेदकल्पनाया बाधितत्वादिति निबिद्धा चानुशासनिकी लक्षणाभाष्यकारैः ताः सुपां कर्मादयोऽप्यर्थाः
संख्या चैव तथा तिङां प्रसिद्धो नियमस्तत्र नियमप्रकृतेषु वेति येसुपां तिङां चार्थाः कर्मादयः ये च तिङां सुपां चार्थाः संख्यादयः तेषु कर्मादिष्वेव द्वितीये ३३

तितिपमः प्रसिद्धः अथ चाकर्मादिपुद्धितियादिरेवेत्यवंप्रवृत्तेपु नियम इति तदर्थ इति सर्वथानुशासनिकपंचम्यर्थान्वयानुरोधात् वह्न्यादिपदे ज्ञा
नलक्षणोत्पत्त आह अत एवेति पर्वतो वह्निमानिति विप्रतिपत्त्येकदेशस्यावृत्तिः प्रतिज्ञेतिमूलं तदेव शोभते यदि विप्रतिपत्त्यर्थतुल्यः प्रतिज्ञार्थः
स्यात् न च ज्ञानलक्षणायां तथा शब्दार्थयोरेकाकारयोः पुनरनुसंधानमावृत्तिरिति भावः ननु पर्वतो वह्निमान्न वेति विप्रतिवाक्ये वह्निमत्त्वरूपार्थो वा का
र्थो विकल्पे संदेहस्वरूपेऽन्वेति स च विषयतया पर्वते समानाधिकरणयोरपि पदयोस्तत्त्वविभक्तिकत्वनियमस्तु निपातविशेषस्याभावात् अत
एव पर्युदासनञ्प्रतियोग्यनुयोगिपदयोस्तुल्यविभक्तिकत्वनियमो दृश्यते ननु विप्रतिपत्तिवाक्ये पक्षैकोद्योः संसर्गो भासते प्रत्येकसंशयानुभवयोगमात्
अत एव वाकारस्य वकलित तथाविधवाक्यात् न वाकार्थबोधः भासतां वा पर्वते तादात्म्येन वह्निमान् तथापि प्रतिज्ञावाक्यं न तत्तुल्याकारकबोधजनकं प्र
तिज्ञावाक्याद्धि धूमवदनुयोगिकसंयोगेन वह्निमत्तादात्म्येन पर्वतेऽन्वयो न तु शुद्धसंयोगेन अत एवायोगोलकं वह्निमत् धूमादिति वाक्यं न प्रमाणं प्रमा
णं चायोगोलकं न धूमात् वह्निमदिति धूमवद्वृत्तिसंयोगेन वह्निमतो भेदस्य नञा बोधनात् अथ प्रथमं प्रतिज्ञासंयोगेन वह्निमत एव तादात्म्येनान्वयः
यमादाय प्रतिज्ञायां विप्रतिपत्त्यावृत्तित्वव्यपदेशस्ततो हेतुसमभिव्याहारेण बोधे जायमाने हेतुमद्वृत्तिसंयोगेन वह्निमानेव भासते यतोऽयोगोलकं
वह्निमत् धूमादित्यादिको न प्रयोग इति चेन्न तर्हि प्राथमिकबोधे न ज्ञानलक्षणेति मिश्रैः कंठत उक्तेः कथं विप्रतिपत्त्यावृत्तित्वहानिः तदुक्तमालो
के प्रतिज्ञालक्षणे हेत्ववयवप्राक्कालिकमुख्यार्थबोधमादाय लक्षणसंगमादिति तत्राह अत एव चेति व्याचष्टे वर्द्धमानोपाध्याया इति शेषः

३४

यथासंभवमिति। जन्यत्वाद्वौ हेतुत्वमुत्पादकत्वं नित्ये तु ज्ञापकत्वं यत इति पंचम्या प्रतिपाद्यते इति व्याख्यानुरोधाय इत्यभिप्रायः तथा च हेतावि ति
सूत्रमेव ज्ञापके पंचम्यनुशासकं ज्ञापके हेतुपदप्रतिपाद्यत्वं वर्द्धमानसिद्धमिति भावः॥ ॥नन्वेवं हेतुत्वमुत्पादकत्वमिति व्याख्यानादुत्पत्तिरपि पंच
म्यर्थः स्यादर्थसिद्धव्याख्यानमिदमिति यदि तर्हि ज्ञापकत्वव्याख्यानमपि तथैवेत्यत आह अत एव चेति इदमप्यात्ततः तद्गृहं वह्निमदिति वाक्येन प्रथमं बुद्धव
ह्निमत्त्वं गृहे प्रत्याय्यते तदा हि तत्र सहकृतेन प्रश्नवाक्येन तु वह्निपदज्ञानलक्षणा सहकृतेन किं हेतुज्ञानविषयवह्निमदित्याकांक्षा ज्ञापकस्येति ततो धूमादि
त्यत्र पंचमीतेनोत्तरेण तद्गृहं वह्निमदिति पूर्ववाक्याहृतिसहकृतेन धूमज्ञानज्ञाप्यवह्निमदिदमिति प्रतिपाद्यः प्रत्येति। न च तद्गृहं वह्निमदिति वाक्येन याव
त्प्रतीतमभीष्टज्ञानविषयवत्त्वं तावद्बोधकमेव प्रश्नवाक्यमुचितमत्र चाभीष्टं ज्ञापकतावच्छेदकरूपावच्छिन्नज्ञानहेतुकज्ञानविषयवह्निमत् गृहं पूर्व
वाक्येन च वह्निमत् गृहमात्रबोधितमिति अनवगतस्य हेतुत्वस्यैव ज्ञानस्यापि बोधकं प्रश्नवाक्यमपेक्ष्यते तत्र च पंचम्या एव ज्ञानार्थकत्वेऽपुष्यते इति शिरोम
णेराशय इति वाच्यं पंचम्या ज्ञापकत्वार्थकत्वेऽपि ज्ञानवह्निसंबंधस्य पूर्ववाक्यात् प्राप्तस्याभीष्टज्ञानविषयस्य च प्रश्नवाक्येऽनुल्लेखेन तत्र वाप्यसंगतेः हेतुमह
त्त्विसंयोगेन वह्निमत्त्वो जिज्ञासितत्वेन पूर्ववाक्यादप्राप्तत्वेन च तस्यापि प्रश्ने उल्लेखताप्तेश्च अथ प्रतिज्ञावाक्यप्रश्नवाक्याभ्यां समभिव्याहृतस्य पञ्चबोधयितु रामः
राकांते स एव जिज्ञासितः प्रश्नवाक्ये न विशिष्योल्लेखनीयः संसर्गासिद्धत्वं तथैवेति चेत् एवं सति लिंगपंचमोः समभिव्याहृतस्याप्यपदस्य ज्ञानलाक्षणिकत्व
ध्रौव्यान् हेतुप्रश्नसमभिव्याहृतपूर्ववाक्येनावश्यलभ्यत्वात् ज्ञानांशस्य प्रश्नवाक्ये कुतः इत्युल्लेख इति किमनुपपन्नं अत एवात्र शत्रुर्नास्तीत्यस्कंधक ३४

स्येतिप्रश्नश्चेत्तस्येत्युत्तरं च संगच्छते अन्यथा पूर्ववाक्ये नञा शत्रुसामान्याभावो बोधित इत्युत्तरप्रश्नस्य शत्रुविशेषाभावस्य प्रश्नवाक्ये तु हेतुत्वप्रसंगात् त
स्मात् समभिव्याहारलभ्यो न इष्ट्यते इति प्रष्टुः कौशलमनुपपन्नत्वेन ख्यापितमिति महदवैदग्ध्यं दीधितिकृतामिति दिक्।। ।। हेतुर्न पंचम्यर्थोऽपि
तु हेतुमानिति व्यवस्थापयति दाहो दहनादिति अत्र यदि हेतुता पंचम्यर्थस्तदा तस्या वृत्तिनियामकसंबंधावच्छिन्नप्रतियोगिताकाभावो नञा बोध्य
त्तदा होनदहनादित्यपि प्रसज्येत दाहे दहनवृत्तिहेतुताभावसत्त्वात् निरूपितत्वसंसर्गस्य तन्नवृत्तिनियामकतया प्रतियोगितानवच्छेदक इति भावः इद
मप्यामततः घटेन पारिमाण्डल्यादित्यादौ जन्यतायां पारिमाण्डल्याभाव एव भासते पारिमाण्डल्यजन्यत्वस्याप्रसिद्धेः तथा च वृत्तिनियामकसंबंधो न
प्रतियोगितावच्छेदक इति मते सर्वथैवानुपपत्तेरित्येषा दिक्। ।।ज्ञापकहेतुत्वं न पंचम्यर्थोऽपि तु ज्ञाप्यहेतुत्वमित्यत्र हेतुमाह जलं स्पर्शवदिति रूपा
दित्यत्र ज्ञापकता यदि पंचम्यर्थस्तदा तस्याभावः स्पर्शे निबाधित इति न रूपादित्यपि प्रसज्येत न गंधादितिवत् न च न गंधादित्यत्र गंधवृत्तिज्ञापकता
या स्वनिरूपितज्ञाप्यतासंसर्गावच्छिन्नप्रतियोगिताकाभावो विषय इति वाच्यं वृत्तिनियामकज्ञाप्यतासंसर्गस्य प्रतियोगितावच्छेदकत्वासंभवादिति भा
वः इदमप्यवद्यं पक्षधर्मताभ्रमसहकारेण जलीयस्पर्शस्यापि गंधव्याप्यतया स्पर्शत्वावच्छेदेन वा गंधव्याप्यत्वाभावस्यापि बोधयितुमशक्यत्वात् अथ गं
धात् स्पर्शवानित्यत्र गंधवद्वृत्तिसमवायसंसर्गेणैव स्पर्शवत्ता प्रतीयते इति जलं गंधात् स्पर्शवदिति वाक्यमप्रमाणमिति मतमाश्रीयते तदा न गंधात्
स्पर्शवज्जलमित्यादौ नाद्यसंसर्गेण गंधज्ञापकतानिरूपितस्पर्शवद्भेदो जलेन ञा बोध्यत इति कथं ज्ञाप्यत्वाभावबोधकत्वमस्य शक्यते यद्विवाहे त्वधि

३५ 35 कत्वाद्यवच्छिन्नसाध्यनिरूपितविशेषणतासंसर्गेणोवह्नेर्ज्ञाप्यत्वान्वय इति। तादृशविशिष्टसंसर्गस्याप्रसिद्ध्या जलं स्पर्शवत् गंधादित्याक
स्याप्रामाण्यमित्युच्यते तदापि तदानगंधादित्यत्र तादृशविशिष्टसंसर्गाप्रसिद्ध्या तदवच्छिन्नप्रतियोगिताकाभावोपि कथं प्रसिध्येत् यदि वायपर्वतो व
ह्निमान् धूमादित्यादौ धूमपदलक्ष्यस्य धूमज्ञानस्य पर्वतवृत्तिधूमज्ञानीयनियनिरूपकतासंसर्गेण पंचम्यर्थज्ञाप्यतायामन्वयोऽत एवायोगोलकं वह्नि
मद्धूमादित्यादिकमप्रामाणिकमिति मतं तदापि जलं स्पर्शवत् गंधादित्यादौ जलवृत्तिगंधस्याप्रसिद्ध्या तादृशज्ञाप्यताभावो नवबोधयितुं न शक्यते त
स्माज्जलं स्पर्शवद्गंधादित्यादौ गंधवद्वृत्तिसमवायेन स्पर्शवत्तोभेदो जलेन ज्ञाप्यत इति सारं तत्र ज्ञापकताज्ञाप्यतावा पंचम्यर्थो भवतु उभयथापि न कि
मपि हीयत इति ध्येयं अत एवास्वरसाद्वास्तु दर्शनांतरमाह नापि शब्दादिति जलं स्पर्शवच्छब्दादित्यत्रापि स्पर्शे शब्दज्ञाप्यत्वाभावो बाधितस्तथापि पंच
म्यर्थज्ञाप्यत्वस्य हेतुव्यापकताविशिष्टविशेषणतासंसर्गेणान्वयात् तादृशसंसर्गावच्छिन्नप्रतियोगिताकशब्दज्ञाप्यत्वाभावो न ज्ञाप्यत इति ज्ञापकतायाः
पंचम्यर्थतावादेपि हेतुव्यापकताविशिष्टनिरूपकत्वेन वा पंचम्यर्थसंसर्ग इति तस्य वृत्त्यनियामकतया प्रतियोगितावच्छेदकत्वं दुरुपपादमिति भावः॥ ॥लक्ष
णोवेति हेतुमत्त्वस्य त्वदुक्तया तत्र शब्दाभ्युपगमेपि ज्ञाप्यत्वे शब्दोल्लक्षणाया एवाभ्युपगमात् लाक्षणिकपदवत्त्वं निगमनेऽतिव्याप्तमतः पंचम्यंतत्वमुपादेय
मिति भावः तत्रापि ज्ञापकत्वं न हेत्वर्थः निरूपकतासंसर्गस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकतया गंधादित्यादावनन्वयप्रसंगादिति पर्यवसितं राम॰ ३५
वृत्त्यनियामकसंबंधो न प्रतियोगितावच्छेदक इति किमाप्तवाक्यप्रामाण्यतः कुतश्चिदुपपत्तेरवधारितमाद्ये बहूनि महामुनिवचनानि गोष्ठ्यद्रवदुलं

घितवतो निष्प्रकारकज्ञानजन्यत्वं वा लेमज्जनमुचितं द्वितीये कानामेयमुपपत्तिः प्रतियोगितावच्छेदकतयाऽस्य नियामकः संसर्गो नास्तीति प्रतीवसा
नावगाह्यत इत्यनुभवो वावगाह्यत इत्यनुभवो वा आद्योऽसिद्धः द्वितीयस्तु संयोगादिवृत्तिनियामकसंसर्गस्यापारणात् नहि घटो नास्तीत्यनुभवानंतरं सं
योगं प्रतियोगितावच्छेदकत्वेन जानामीत्यनुव्यवसायो बालोकानां सांसर्गिकविषयत्वस्यायोग्यतात् अथ घटो नास्तीति बुद्धिरेव काचित् संयोगेन घटव
त्तायाबुद्धिमेव प्रतिरुणद्धि न चानंतप्रकारविशेष्यसंसर्गकत्वं चेचिअमिति परिशेषात् संसर्गतावच्छेदकत्वं तदपि निःपीयमानं संयोगावच्छिन्नत्वमि
त्युपपत्तिरस्तित संयोगादेः प्रतियोगितावच्छेदकत्वसाधिकेति चेत् एतावतापि संयोगयोग्यावच्छिन्नत्वं च प्रतियोगिता चेति परस्परवैशिष्ट्यापन्नं घटो नास्ती
ति प्रतीति विषयत्वस्य प्रामाणिकमेव संयोगसंसर्गावच्छिन्नप्रतियोगितेति त्वयाभिलप्यमानाऽऽमक्तिः सामान्याभाव विशेष्यस्वरूपातिरिक्ता वा तत्सांप्रतीतौ
विषयो न तु समवायसंसर्गावच्छिन्नप्रतियोगित्वेनाभिलप्यमाने से तावता संसर्गकत्ववैचित्र्यगौरवेणैव तद्वैचित्र्यसिद्धेः संयोगसंसर्गावच्छिन्नप्रतियोगितां
कोभाव इति प्रतीति व्यवहारौ तु संयोगेन विशिष्टबुद्धिप्रतिबंधकज्ञानविषयमतोभावमालंबते कश्चायं व्यामोहो यदस्य नियामकसंसर्गेण विशिष्टबुद्धिं तं का
चिदप्यभावबुद्धिर्न प्रतिबध्नातीति किंच विशेषणतापि विशेषणतात्वेनैव नियामिका न तु हेतव्यापकत्वविशिष्टविशेषणतात्वेनेति तादृश्येण प्रतियोगि
तावच्छेदकोयं संसर्ग इति कस्य प्रमाणस्य गोचरः तस्मात् धूमपदं धूमज्ञानस्य पंचमी हेतुतायां वह्निपदं ज्ञाप्यमानवह्नेर्ज्ञानवन्त्योर्बोधकं धूमत्तानस्य धू
मभिन्नजन्यज्ञानवृत्ति विशेषणतया हेतुतायां तस्याश्च पर्वतोद्देश्यकविधेयकानुमितित्वावच्छिन्ननिरूपकतयाऽऽज्ञानेन्वयः अयोगोलकं वह्निमत् धूमादि

३६ धनाद्येसादौ अयोगोलकोद्देश्यकवह्निविधेयकानुमितित्वावच्छिन्ननिरूपकतया धूमभिन्नधूमज्ञानेन्धनादिहेतुताया बाधादप्रामाण्यं तत्र न धू
36 मात्रत्वेंधनादिसाधारणवाचकतादृशनिरूपकतासंसर्गावच्छिन्नप्रतियोगिताकोधूमभिन्नज्ञाननिष्ठहेतुताविशेषणतया धूमादिज्ञानविशिष्टापादहेतुताया अभावः
प्रत्याय्यते अयोगोलकं वह्निमान् धूमवत्त्वव्याप्येन्धनवदित्यादिज्ञाने विद्यमानापि हेतुता व्याप्तिपक्षधर्मतांशे भ्रमात्मकज्ञाननिष्ठैवेति न दोषः । अपि इदं
वाक्यं न चानुशासनमुल्लंघ्य जन्यतानिरूपकतायाः पंचम्यर्थ इति मतमुचितं पर्वतो वह्निमान् संयोगेन धूमान्न तु समवायेनेत्यादौ संयोगसंसर्गकत्वं तृतीयार्थ ता
र्थो धूमपदार्थ तद्ज्ञानान्वयी समवायसंसर्गकत्वाभावो नञर्थस्तथा एतेन धूमपदार्थो धूम एव ज्ञानं तु प्यत्वं पंचम्यर्थः सपिपर्तृत्तं संयोगेन धूमादित्यादौ पं
चम्यर्थज्ञाने तृतीयार्थसंसर्गत्वस्यान्वयायोगात् सुवर्थयोः परस्परान्वयस्याविरोधात्तेनेव साधितमुचितत्वादिव्यर्थदंडादिति प्रतितानिराकरणेन कस मूढ
नीयं धूमादालोकवान्पर्वतो वह्निमान्धूमादिति प्रतिज्ञावाक्यस्य साध्यान्वितार्थकत्वेन पंचमीविशेष्यतामतआह धूमाद्वह्निमत्त्वसिद्धि न च वह्नित्वावच्छेदे
न धूमज्ञाप्यत्वे प्रतीत्ययेव प्राप्ते हेतोराकांक्षानुदयादनाकांक्षिताभिधाने निग्रहस्थानप्रसंगात् हेतुवचनावतारो न स्यादिति वाच्यं शुद्धवह्नित्वावच्छेदेन ज्ञापकाकां
क्षायाः प्रतीत्यविच्छेदेपि सत्त्वे वह्नित्वावच्छेदेन तदाकांक्षाया अविच्छेदात् तत्परिपूरणसमर्थहेतुवचनोत्थानात् धूमात् वह्निमान्पर्व [illegible]
[illegible] तो वह्निमान्धूमादित्यादावुद्देश्यतावच्छेदकविधेययोः केनापि आदेवगांकार्थबोधासंभवात् नतानह सोम्याप इतिनन्वेवमपि प्रकृतपक्षे राम०
प्रकृतसाध्यान्वितार्थकत्वेन पंचमीविशेष्यतां किंसाध्ये प्रकृतत्वेन तत्राह पर्वतो धूमाद्वह्निमानिति प्रकृते साध्ये प्रकृतपक्षबोधकपदसाकांक्षप्रकृतसा ३६

ष्पबोधकपदसाकांक्षाया पंचमीतदन्तलाक्षणिकपदस्वद्वयत्वं समुदायार्थः अयं रक्तो जयाकुसुमत्वादित्यत्र तस्माद् रक्त इति निगमने पक्षान्वितसा-
ध्यान्वितार्थकाप्रथमान्तदन्तलाक्षणिकपदत्वमिति तत्रातिव्याप्तिः पंचमीति जन्यत्वे ऽस्तितसिलादिसादौ चरमत्वपदं भाकानृपाचकानुमानानकादिसादौ
ककारादिरेव हेतुज्ञाने लाक्षणिक इतरेवर्णास्ता स्वर्यग्राहकादेस्तसिलसंधिः प्रागल्भं प्रसवस्तव्याप्यतिरेक इति यत्तिसादिना मिथ्यात्वपंचम्यंतेति अत्राद्या-
भावे प्रतिज्ञायां लाक्षणिकवसागे निगमने ऽनुमितिपरत्वाविशेषणोदासीनतादृशवाक्येन तमतन्त्रितयगर्भमिदं लक्षणमिति व्याख्यायप्रतिज्ञायां तान
लाक्षणिकसाध्यपदव्यवस्थापनावसरे भवाद्भाक्षणादिपदवद्वयवा तरणारणार्थं पंचम्यन्तपदमिसाधारंक्लाक्षणिकपदवत्त्वनियतानुमितिपरवाक्यत्व
सावह्यपवाच्यत्वेन तत एव तादृशावयववाक्यानां संभवादिति समादधुः तन्मतं निरूप्य प्रदर्शयति केचित्तिसादिना हेतुमवयवतावच्छेदकं रूपान्तरमपरिचित-
तमत आह तादृशेति न प्राप्तीति तथा चमोलंलक्षणामतंभव्यव्यासंवेतिभावः पक्षधर्मेत्यादि पंचम्यन्तेन पदेन यद्धर्मविशिष्टमुपस्थाप्यते इत्यर्थः धूमपदस्यत-
ज्ज्ञानलाक्षणिकत्वाभ्युपगमे तु ज्ञाने ऽव्याप्तिः प्रदर्शितत्वमिति भावः ननु पंचम्यन्तेन यज्ज्ञानमुपस्थाप्यते तत्स्येवव्याप्तिप्रदर्शनमत आह अन्यथेति अत्राहुः पंचम्यन्ते-
ताद्युशुद्धं प्रातिपदिकयोर्लक्षणायैवोपपत्तौ न पंचम्यां लक्षणेति वाक्यमात्रस्य सांप्रदायिके ऽपि सुपठत्वान्न च पदद्वये न लक्षणया पदार्थोपस्थापकत्वं कल्प-
नीयमिति प्राचां गौरवं वक्ष्यपदेषु शक्त्या तथात्वं कल्पनीयमिति न व्यानामपि गौरवात् यद्धर्मविशिष्ट इत्याद्यपि प्रलापमात्रं यद्धर्मावच्छिन्नज्ञाने पंचम्युपा-
त्तहेतुत्वान्वयस्तद्धर्मावच्छिन्नेव्याप्तिपक्षधर्मतयोरुत्तरावयवैः प्रदर्शनादिति संप्रदाय एव श्रेयानिति दिक्।। ७।। मूले नत्थेवाकांक्षानिवृत्तेरिति तथे-

३७ वहेतुपदेन ज्ञानलक्षणादेवयोग्यतया तत्र साध्यज्ञाप्यतान्वये ज्ञापकाकांक्षानिवृत्तेरित्यर्थः पंचभिरवयवैः पंचविजातीयवाक्यार्थबोधजन्यज्ञे परंप
37 र्यापदार्थपरामर्शकारणानीत्याशयवतां केषांचिद्धेत्ववयवलक्षणमाह अनुमितीति अनुमितिहेतुज्ञानकारणवृत्तिः धूमादित्यादिशाब्दजन्यज्ञानवृत्तिः
प्रतिज्ञाजन्यज्ञानावृत्तिर्याजातिः तद्वज्ज्ञानजनकवाक्यत्वं हेतुत्वमित्यर्थः हेतुप्रतिरूपकोदासीनवाक्यजन्यज्ञानेपि सुखविशेषादिजनकतावच्छेदिकाजा
तिः संभवतीति उदासीनवाक्येऽतिव्याप्तिवारणाय प्रथमं वृत्तित्वं समयबंधवाक्यार्थबोधवृत्तिवैजात्यमादाय तत्रातिव्याप्तेर्वारणाय द्वितीयं तादृशशाब्दबोधत्व
जातिमादाय वाक्यमात्रेऽतिव्याप्तेर्वारणाय वृत्त्यन्तं तज्जातीयशाब्दबोधजनकपदार्थस्मरणहेतुत्वैकदेशादावतिव्याप्तेर्वाक्यत्वमुपात्तं अन्यदित्यनेन पूर्वं निरुक्त
स्याद्रितिसूचितं तादृशजातौ मानाभावात् तत्तत्संज्ञातौ प्रमाणं विघ्नत इत्यपरे तेषां मतमुपन्यस्यति जातिं विनेत्यादि अनुमितिजनकत्वं नत्वनुमितिजनक
परामर्शजनकत्वं नतु न्यायांतर्गतधूमादित्यादिवाक्यजन्यज्ञानत्वादिना पदार्थपरामर्शकारणत्वं स्यादत आह वाक्यविशेषेति अन्वयेत्यादि अन्वयव्याप्त्यभिधा
यकोयोवयवः उदाहरणं तस्याभिधानं प्रथमवर्णितस्य प्रयोजकं प्रागभाववत्त्वज्ञानजनकत्वं कालविधया तद्व्याप्यत्वं तेन तादृशोदाहरणपूर्ववर्त्तित्वं तच्च
प्रतिज्ञायामपि गतमतो हेतुत्वेत्यादि तेन कथितहेत्ववयवलक्षणमनुपलक्ष्यते तेन यन्न्यायीयान्वयुदाहरणपूर्ववर्त्तित्वं तन्न्यायीयहेत्ववयवत्वं लभ्यते अन्नो
दाहरणं व्यतिरेकव्याप्त्यवगमकत्वेन विशेषणीयमतोऽन्वयव्यतिरेकिणि हेतौ नातिव्याप्तिः एवं व्यतिरेकिलक्षणेपि बोध्यं अत्रोपवर्णितप्रभवोवारणात्तयो राम॰
योनागजातः स नगजो यथा अंजनपुंडरीककुमुदादिरितीदमुदाहरणं अन्वयतो व्यतिरेकतश्च व्याप्तिंगमयति तथाहि योनागजातो गजजातीयः स नगा ३७

ज्ञातो यथा अंजनादि दिग्गजइत्यन्वयतो· योऽगज्ञातो न भवति सगजो न भवति यथा कज्जलपङ्केर्वादिति व्यतिरेकतो व्याप्तिर्नोदाहरणेन लभ्यते त
त्पूर्ववन्नीहेत्ववयवोऽन्वयव्यतिरेकेसादिनालक्षितः समयबंधवशाद्भयविधमुदाहरणमपि कुत्रचित्न्याये प्रयुज्यत इत्यपि वदन्ति नोदाहरणविशेष
प्रयुक्तं हेत्ववयववत् त्रैविध्यमपि तु हेतोरन्वयिव्यतिरेकित्वप्रयुक्तं द्वैविध्यमित्याशयेनाह· पक्षे सादि पक्षसत्त्वरूपनपक्षसत्त्वपक्षसत्त्व इति दृष्टांततत्साधु
नयासमन्वयत्वार्थं अत्रकेवलव्यतिरेकी हेतुर्नास्तीति भावः अथान्वयसहचारग्रहतदग्रहस्वरूपदर्शाद्वैविध्यप्रयुक्तं हेत्ववयववद्वैविध्यमित्याशयेनानि
र्वक्ति अनुमितीत्यादि अत्रजनकीभूतेनावयवत्वं तत्सहितहेत्वित्यादिना हेत्ववयवत्वं लभ्यते तेन व्याप्तीतसाध्यसामानाधिकरण्यकहेतुबोधकहेत्ववयवत्वं·
व्याप्तीतसाध्यसहचारकहेतुबोधकहेत्ववयवत्वं चान्वयिहेत्ववयवत्वं व्यतिरेकिहेत्ववयवत्वं च पर्यवस्यति॥ ॥मीमांसकास्तु धूमहेतुके विन्यायेधूमवत्त्वा
दिति त्रयोऽयं न तु धूमादिति न्याये हेतोः पञ्चसंसर्गप्रतिपादनावश्यकतया मनुपात्तदभिधानौचित्यात् उपनयादिकं न न्यायावयवः· अत एवायोगोलकं वह्निम
त् धूमादिति वाक्यमप्रमाणमित्याहुः तान्प्रत्याह कथापामिति व्यर्थत्वादिति मनुपासंबंधाभिधानेपि न तस्य पक्षान्वयो निराकांक्षत्वात् अतः पक्षधर्मताप्रद
र्शनार्थमुपनयो नामावयवांतरमेवोचितं· अपक्षधर्म हेतुकहेत्ववयवस्य प्रामाण्यं तु प्राग्रुपेयादित्यमितिभावः यत्र धूमसंबंधस्य हेतुत्वमभिप्रेतं तत्र धूमवत्त्वादि
ति प्रयोज्यमेव परं तु यो धूमवत्त्ववानित्यादिकमत्रोदाहरणं न तु धूमवानिति मित्या अप्येवं अपार्थकमिति अभिमतबोधोपयिकाकांक्षारहितमित्यर्थः
विभक्त्यंतरावच्छ दूषयेत्स्वरूपलक्षणं पंचमीप्रकृत्यनुपस्थापितत्वेसपि दृष्टव्यं विशिष्टहेतुतान्वयादिति सामान्यवत्त्वे सतीत्यादौ त्वयदस्यज्ञाने लक्षणान्तत्र

३८ 38 शक्यार्थस्यपदांतरसमभिव्याहृतार्थविशिष्टस्यैवान्वयो नीलोघटोनास्तिचैत्रस्यपुत्रोनास्तीत्यादौतथादर्शनात् अवगत्या· तत्पदमेवतादृशविशिष्टज्ञा
नलाक्षणिकंपदांतरपरं· तात्पर्यमात्रग्राहकं· तादृशज्ञानस्यचभ्रमभिन्नवृत्तिविशेषणतयाहेतुतायामन्वयात् पंचम्यर्थेनसमभ्यर्थान्वयविरहा
त्नानुपपत्तिरितिभावः नन्वेवंतत्पदमात्रस्यलाक्षणिकत्वेऽन्तरेवर्णव्यर्थ्यादस्यात्मतआहतत्रैवेति तत्रैवेतरसमभिव्याहारेणैवांसपदस्यविशिष्ट
ज्ञानेप्युत्पत्तिर्निरूढलक्षणानामपेत्यर्थः निरूढलक्षणायांतात्ज्ञानिकोप्यविगमः प्रमाणमित्याह नहीतिहेत्वर्थोदाहरणार्थयोः संगतिमाह·हेता
वुक्ते इति कथंकेनोपपादकेनाकांक्षा·जिज्ञासा· तथाचहेत्ववयवानंतरोदाहरणाभिधानप्रयोजिकाहेत्वर्थगमकत्वोपपादकं किमितिजिज्ञासा· तज्ज
नकज्ञानविषयत्वउपपादकत्वस्वरूपोपोद्घातोगमकत्वव्याप्त्योः संगतिरितिभावः लाघवादत्रैवोदाहरणोपनययोरपिसंगतिंदर्शयति व्याप्तीत्यादि प्रा
थम्यात्·प्रथमजिज्ञासितत्वात् तथाचावसरसंगतिः सूचिता· अनुमितीति·जनकांतस्यन्यायावयवत्वमर्थः तेनोदासीनतादृशवाक्यानामावृत्तिः व्याप्यत्वं·
व्यापकतानिरूपकत्वं·तेनयद्धर्मविशिष्टनिरूपितायायद्धर्मावच्छिन्नव्यापकतायाज्ञानंप्रकृतलिंगकप्रकृतसाध्यकानुमितोपयिकं·तद्धर्मविशिष्टवत्तित
द्धर्मविशिष्टवैशिष्ट्यबोधकन्यायावयवत्वमित्यर्थः अनुमित्योपयिकीचव्यापकताबुद्धिर्द्वेधा·साध्यतावच्छेदकविशिष्टहेतुतावच्छेदकावच्छिन्नव्यापक
तामवगाहमाना·हेत्वभाववत्तावच्छेदेनसाध्याभावव्यापकतावगाहिनीच·एवंचहेतुमतिसाध्यवत्तावगाहिनोयोयोधूमवान्सवह्निमानित्यस्यसाध्या राम· ३८
भाववतिहेत्वभावावगाहिनोयोनवह्निमानसधूमवानित्यस्यचोदाहरणत्वोपग्रहः नन्वेवमपिगंधवतीगंधादित्यादौप्रतिज्ञायामतिव्याप्तिः व्याप्यता

भिमतवहुद्देशेनज्ञापकत्वाभिमतविधायकत्वात् नचसर्वेनाम्नोपस्थितत्वंव्यापकत्वाभिमतविशेषणं॰ तावतापीयंरूपवतीत्यादौगंधवत्त्वइदमा
परामर्शेप्यतिव्याप्तिनादवस्थ्यात् यथाचहेतोः पक्षतावच्छेदकत्वेप्युपनयःसंभवति तथाप्रतिज्ञादितमधर्मतादिति चेन्न अतएवनियतपदोपादानात् ते
नज्ञाप्यत्वाभिमतवहुद्देश्यतानिरूपितज्ञापकविधेयताबोधजनकत्वव्यभिचार्यवयवतावच्छेदकरूपशून्यावयवत्वमित्यर्थः पर्यवस्यतीति दिक्॥ ॥९०॥
न्यायेति न्यायावयवत्वे सतिदृष्टांतवचनमित्यर्थः असार्वत्रिकत्वादिति तथाचदृष्टांतविनाकृतोदाहरणाव्याप्तिरिति भावः व्याप्तिप्रतीतेरिति विप्रादमुप
दिष्टात्प्रतारपिष्यते उपनयइति निगमनेचेतिशेषः उपनयाभिधानेति उपनयाभिधानप्रयोजकत्वमुपनयपूर्वत्वंजिज्ञासाजनकत्वं हेत्ववयवोत्तर
त्वंविशेषणलक्षणोव्याप्तिविषयकबोधजनकत्वमुदाहरणावयवस्यसंदिग्धमित्यस्वरसोऽन्यइत्युक्त्या सूचितः अत्रचेत्यादि वीप्सितपदद्वयसमभिव्याहृत
तच्छब्देनवीप्सितेनवायावत्तांधूमवत्तामुपस्थितेनोत्तत्रवह्निविधानात् धूमादिकरणोकुत्रापिवह्निविरहशंकानोदेतीतिव्यभिचारशंकाविघटनायवीप्सो
पादानंविघटितायांव्यभिचारशंकायामुदाहरणीयदृष्टसहचारात्मननसाध्यव्याप्तिग्रहः सूपपदइतिभावः यत्रचस्वतएवव्यभिचारशंकाविरहस्तत्र
वीप्सानोपादेया॰ यथाकेवलान्वयित्वेनगृहीतेवक्तृनिसाध्योयोघटःसप्रमेयइतिघटभिन्नाभेदेसाध्येघटत्वादिति हेतौचयोघटःसघटभिन्नभिन्नइत्येवोदा
हरणंप्रयोज्यंहेतुमतिघटेघटभेदादिसंदेहस्यस्वतएवानुत्पादादित्याहयत्रेत्यादिना भेदानुमानेचेत्यंतेन॰ वीप्सायामपीति ग्रामोग्रामोरमणीयइत्या
दौग्रामत्वेग्रामेवा रमणीयव्याप्यत्वंनपदार्थोनिवानाकांक्षइति कथंशाब्दबोधगोचरः नचद्वितीयग्रामादिशब्दस्यव्याप्तिरर्थः प्रमाणाभावात् नित्यंवीप्सयो

३९ 39 रितिसूत्रे व्याप्तुमिच्छा वीप्सेति सुसमस्तव्याप्तिबोधेनेच्छायां द्विर्वचनप्रयोगोऽनुशिष्यते· ननु व्याप्तिर्द्विर्वचनार्थ इति सूत्रार्थस्तथा सति हि निरुक्तव्याप्तोरि
त्येवमुनिः सूत्रयेत् द्विर्वचनस्थले व्याप्तिबोधस्तु मानसः द्वितीयशब्दप्रयोगप्रयोजकत्वेन व्याप्तिरुद्भावकगतापि मनसा तदुपस्थितिसंभवात् न चैवं सू
त्रेमूर्त्तरूपवद्दिशादिवाकाश्याप्तिग्रामारण्यप्रसंगः द्विर्वचनप्रयोजनज्ञानाप्रामाण्ये द्विर्वचनस्यासाधुत्वेन तस्याग्रामारण्यव्यवहारात् अत एव क्रोधादावपि
व्यंग्ये यत्रामंत्रितस्य द्विर्वचनं विधीयते तत्र क्रोधादिर्न पदार्थः किंतु मानसस्यैवैंजनिकबोधस्य विषय इति तद्ग्रामारण्यत्ववत्कर्त्तरि अक्रुद्धे तदसाधुत्वव्यपदे
शः साधुत्वं चार्जुनार्जुनसास्मके सास्मके इत्यादौ क्रुद्धेऽप्यस्त्यभिवक्तरि· न हि तत्र क्रुद्धो वक्तेति बोधो व्यंजनां विना संभवति वचनस्य कर्त्तुः क्रोधस्य चापदा
र्थत्वात्· न च व्यभिचारवारणाय वीप्साप्रयोग इति मतं युक्तं· वीप्सितशब्दप्रयोगेन यावतां ग्रामाणां समुपस्थितौ तत्र रमणीयत्वसंबंधग्रहे विरम
णीयभिन्नग्रामत्वसंदेहस्य ग्रामत्वव्याप्यवत्तासामानाधिकरण्ये न रमणीयत्वाभाववत्तासंदेहस्य दुर्वारत्वात् न च द्विर्वचनप्रसत्तिवैचित्र्यात् ग्रामत्वरम
णीयत्वयोर्व्याप्यव्यापकसंसर्गेणान्वयः स्वीक्रियते तामिति वाक्यार्थव्याप्तिरिति वाच्यं एवं सत्याचार्यमते व्यतिरेक्युदाहरणप्रयोगानुपपत्तेः यो यो न वह्नि
मान् स न धूमवानित्यत्र हि तदुपस्थितौ वन्ह्यभाव एव व्यापकतासंसर्गेण धूमाभावेऽन्वेतुमर्हति न च साध्यव्यतिरेकानुमितावुपयुज्यते· व्यतिरेकसहचारेणा
न्वयव्याप्तिग्रह एव तेषामनुमितिप्रयोजकः तस्मात् द्विर्वचनं व्याप्तिबोधमात्रतात्पर्यग्राहकं· गृहीते च तादृशे तात्पर्ये मनसा व्याप्तिग्रह इत्येव साधु· तथा राम०
च प्रयोगप्राथम्ययोरेव तथाविधतात्पर्यव्यंजकयोः सत्वादलं वीप्सयेति चिंतामणिमतभावार्थः तथा च प्रायणतां प्रयोगप्राथम्याभ्यामेव व्याप्तेर्लब्धायां ३९

वीप्सावधारणेऽस्फुटार्थे इति अवधारणमिह वह्निमानेव धूमवानित्युदाहरणत्वादिनामतेनेति मिश्रानुसारी पंथाः॥ ॥उपाध्यायानुसारिणस्तु द्वि
र्वचनात् व्याप्तेर्व्यापकतायाबोधस्तावद्रूपकः कोऽपि ग्रामो न रमणीय इति व्यभिचारबुद्धे सत्सां ग्रामो ग्रामो रमणीय इति वाक्यात् वाक्यार्थबोधानुदया
त् मानसो वा जनिकोऽव्याप्यकतागोचरो निर्णय इत्यसंप्रज्ञातः वीप्सितवाक्ये तदर्थतात्पर्यमेव व्यंजनात् तत्संग्रहीतायामपि रमणीयत्वे ग्रामनिष्ठाभाव
प्रतियोगित्व तदभावयोर्द्वयोर्विशिष्टबुद्धिसामग्र्यां सत्यां संशयात्मकस्यैव व्यापकताबोधस्योत्पत्तेः ननु तात्पर्यग्रहस्य तदितरकोटिग्रहप्रतिबंधकत्वं श्रा
माणिकमत एव ग्रामाणामेकतमस्याप्यरमणीयत्वे ग्रामो ग्रामो रमणीय इति वाक्यस्याप्रामाण्यं प्रामाण्यं च ग्रामो रमणीयो न तु ग्रामो ग्राम इति वाक्यस्य· नि
त्यं वीप्सयोरिति सूत्रे सर्गे नेच्छावाचकत्वमपि तूक्तमुखत्वे लक्षणा· यथा मुमूर्षति· नदीकूलं पिपतिषतीति वत्· तथा च व्यापनोन्मुखत्वे व्यापकत्वैकदेशे शक्ति
रेवानेन प्रतिपाद्यते ग्रामो ग्राम इति समुदायात्मकमेकमेकमेव पदं एकपदस्थाने द्विर्भावविधानात् नरो नर इत्यादौ णत्वावत्तु क्षुभ्नादिगणान्तर्भावात्त
स्य च समुदायस्याखंडताभावप्रतियोगित्वं चार्थः॥ ॥पक्षमिश्रैस्तु कस्मादेशो न शक्तिमानपि तु तेनस्मारितस्थानीति तत्त्वचिंतं लकारादेशानां तिबादीनां
मेकत्वादौ शक्तित्वात् न हि लकार एकत्वादिवाचकः शत्रादेरपि तद्वत्त्वप्रसंगात् आदेशिन आदेशावयवस्य वा ग्रामशब्दस्यार्थो ग्रामो द्विर्भावार्थेऽसं
ताभावे स च प्रतियोगितायां सा च पुनरखंडताभावे रमणीयत्वे पदार्थैकदेशे अन्वेतीति भवतु वा अन्योन्याभावोऽखंडताभावस्य द्विर्वचनार्थः आदेशिग्रामपदा
र्थविशेषिताऽन्योन्याभावो रमणीयत्वावच्छिन्नप्रतियोगिताकस्वरूपस्याधिकरणासंबंधावच्छिन्नप्रतियोगिताकत्वसंसर्गेणाखंडताभावेऽन्वेति स रमणीयपदा

गेहे

४० र्थान्वयी गेहे ऽश्वाइत्यादौ गेहान्वितस्याश्वोन्याभावस्याश्वत्वावच्छिन्नप्रतियोगितावच्छेदकतासंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावोऽश्वत्वावच्छेदेन ब्रा
ह्मणो ब्राह्मणोऽधीतइत्यादौ ब्राह्मणान्वितस्यान्योन्याभावस्याध्ययनकर्तृत्वावच्छिन्नप्रतियोगितावच्छेदकतासंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावोऽध्यय
40 नकर्तृत्वेभासके भवतु वा अभावमात्रं द्विर्वचनार्थः उद्देश्यविधेययोर्येन संसर्गेणान्वयस्तत्संसर्गावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नैव च प्रतियोगि
ताद्विर्वचनार्थयो(भा)वयोः परस्परान्वये संसर्गमर्यादया भासते· तथाच ग्रामो ग्रामो रमणीय इत्यत्र रमणीयग्रामयोरन्वयस्तादात्म्येनैवेति ग्रामान्वितो भा 5
वस्तादात्म्यसंसर्गावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताकत्वसंसर्गेणोपहितीयाभावेऽन्वेति ब्राह्मणो ब्राह्मणोऽधीतइत्यादौ ब्राह्मणविशेषि
तो भावः समवायसंसर्गावच्छिन्नप्रतियोगितासंसर्गावच्छिन्नप्रतियोगिताकत्वसंसर्गेणोपहितीयाभावेऽन्वेति विभक्त्युपनीतं वक्तृसंसर्गतया भासतइति
स्वीकरणीयं अन्यथा गेहे गेहेऽश्वाइत्यादौ सममप्यर्थसंसर्गावच्छिन्नप्रतियोगितालाभायव्युत्पत्त्यन्तरमाश्रयणीयमेकस्यैवग्रामपदार्थस्य द्विधा विशेष्यतया
विशेषणतया वान्वयो द्विर्वचनार्थस्यैकरूपावच्छिन्नस्य च परस्परान्वयो व्युत्पत्तिवैचित्र्यात् एवं च धूमवान् धूमवान् वह्निमानित्यादौ धूमवन्निष्ठाभावा
प्रतियोगि धूमवान्वह्निमानित्यन्वयबोधे व्याप्तिर्व्यापकता च विषय इति निराबाधं ब्राह्मणोऽधीते न तु ब्राह्मणो ब्राह्मणाइत्यादौ ब्राह्मणर्णाद्वस्वभावप्रतियोगिता श्रीराम·
भावाभाववदध्ययनकर्तृतिमान् ब्राह्मणाइत्यन्वयबोधः इत्थं चोदाहरणवाक्ये वीप्सावश्यकी· अन्यथा व्याप्त्यवगमासंभवात् साचयद्यपि तत्पदएवोचिता यो
धूमवानिति वाक्येन विहितस्य धूमवत्तत्त्वच्छेदेन परामर्शस्य वह्निमानिति द्विर्वचनेन व्यापकतायां धूमवान् धूमव्यापकवह्निमानित्यन्वयबोधेनाभिम ४०

तन्निर्व्यूहात् प्रयुज्यते च तच्छब्दे तद्धिर्वचनं महाकविभिः यायां प्रियः प्रेक्षतकान्तराणीसा सा क्रियानन्त्रमुखीयमवेत्सादौ प्रियकर्तृकप्रेक्षणाकर्मका
न्तराक्षी रूपस्य यच्छब्दघटितवाक्येन बोधितस्य विशेष्यविशेषणभावव्यत्यासेन तच्छब्दपरामृष्टस्य व्यापको हीनत्र मुखीमावइत्यन्वयबोधस्यान्यथो
पपादयितुमशक्यत्वात् यच्छब्दवीप्सानवक्रव्यापकताबोधोपयिकी उद्देश्यपदवीप्सया विधेयतद्व्यापकतालाभेन यच्छब्दार्थपर्वतमहानसादिव्याप
कतायाधूमे लाभात् तु वह्नौ धूमव्यापकतायास्तथाविवीप्सायत्सदेन तत्सदेशादिरूपलव्याप्यमर्थः यच्छब्दे नोपस्थिते पर्वतमहानसादौ पर्वतादिव्यापकधू
मवत्तायां यच्छब्दद्विरुक्तिघटितवाक्येन बोधितायामेकेनापि तच्छब्देन धूमवान् व्यापकता च परामृश्यत इति योः परस्परान्वयेन धूमवद्विशिष्टास्पदताभावा
प्रतियोगी वह्निः प्रत्येतुं शक्यत इति शब्दलाघवाय तच्छब्दवीप्सा नोपादेया विरूपोपस्थितयोरित्यप्यत एव संगच्छते धूमवत्तायाव्यापकतायां च विभिन्ना
भ्यां रूपाभ्यामुपस्थिताभ्यां तच्छब्देन द्वयोः परामर्शे बुद्धिक्षमातेन तच्छब्देनैकेन तच्छब्दार्थयोः परस्परान्वयोत्पत्तिसिद्धेः अत एव तावन्नलाभ्यां लाघ
वात् तच्छब्दशक्तिमत्तत्त्वदात्तस्मादिसादौ धूमज्ञानलाभः अत एव येन पच्यते तमानयेत्यादौ यच्छब्दघटितवाक्येन वीतमुपस्थितानां याकृत्तिपदार्थ
व्यक्तीनां तच्छब्देन परामर्शे पाककर्तृव्यक्तिमानयेत्यन्वयबोधः अन्यथा यच्छब्दवाक्यार्थस्य व्यक्तिकर्तृयाकस्य तदा परामर्शेऽनन्वयप्रसंगात् यत्र च तच्छब्दे वी
प्सा दृश्यते तत्र तच्छब्दद्विर्भावस्यैव व्यापकत्वमर्थो यच्छब्दवीप्सानुत्तरयच्छब्दद्विर्भावोपात्तव्यापकत्वस्यैव तच्छब्देन परामर्श इति यत्तदोर्नित्याभिसंबंधस्यु
त्यन्तिसिद्धा नन्वेवं योयो धूमवान् स वह्निमानित्यादौ तच्छब्देन यच्छब्दार्थमहानसादेः परामर्शे धूमवन्महानसनिष्ठात्यन्ताभावाप्रतियोगित्वमुदाहृ

४१ रणात्लभ्यते॰ ननु धूमव्यापकत्वं॰ यदि च यच्छब्दार्थमहानसादिपरीहारेणाधर्मधूमवत्वेन परामृश्यते तद्दा विधेयः पचति सज्जानातीत्यादौ न
दापाककर्त्तानपरामृश्यते यच्छब्दघटितवाक्ये कृतिमद्वाचकपदाभावात् वाक्यार्थपरामर्शे च पाककर्त्ते चैत्रादिव्यापकत्वेनैव लभ्यते इति चेत्॰ न॰
41 यच्छब्दघटितनिर्मितचैत्रादिपरीहारेण पूर्ववाक्यार्थस्य पाककृतिमतस्तच्छब्देन परामर्शात् अनुपपत्त्यभावात् समवायेन पाककृतिमति तच्छब्दस्य
शक्तिरेव यदि च कृतिमत्ताद्यपेक्षया गौरवात्न कृतिर्न सर्वनामशक्यतावच्छेदिकेत्युच्यते तदा तत्र भवतु निरूढालक्षणा एवं व्यापकत्वप्रकारकोबोधः उ
दाहरणादुपपद्यते यदि च द्विर्वचनं न व्यापकत्वार्थकं तदा ग्रामो ग्रामो रमणीय इत्यादौ ग्रामत्वव्यापकरमणीयतादात्म्येन ग्रामे रमणीयस्य ब्राह्मणो
ब्राह्मणोधीते इत्यादौ ब्राह्मणत्वव्यापकाध्ययनकृतिसमवायेन ब्राह्मणेध्ययनकृतेरन्वयः स्वीक्रियतां यदि ग्रामो रमणीयो न ग्रामो ग्राम इत्यादौ न
त्वर्थान्वयउपपादयितुं शक्यते इत्थं च यो यो धूमवान् स स वह्निमान् इत्यनेन महानसादिर्महानसादिव्यापकधूमवानिति स वह्निमानित्यनेन धूमवान् धूमव्यापकव
ह्निमानिति बोधो जन्यते तत्र यथा महानसमिति वाक्ये यथाशब्देन प्रक्रांतवाक्यविधेयो धूमवह्नी परामृश्येते॰ तेन महानसं धूमवत्वह्निमदिति दृष्टांता
दन्वयबोधः एतेन धूमवान् धूमव्यापकवह्निमानिति प्रक्रमे यथा योगोलकमिति साधनविकलोपि दृष्टांतः प्रसज्येत॰ न हि यथाशब्देन पूर्वशब्द उद्देश्य
तावच्छेदकाधर्मः परामृश्यते॰ मुखमाल्हादकं यथा चंद्र इत्यादौ मुखत्वपरामर्शेतो योग्यत्वप्रसंगादिति समाहितमिति प्राहुः॥ ।मिश्रास्तु संबंधस्य व्ह राम०
पायाक्तेः हेतौ साध्येवा प्रकारतया भानार्थं यत्र यत्र धूमस्तत्र तत्र वह्निरित्युदाहरणाशरीरमिति प्राहुः॥ साध्यसाधनोभयाधिकरणतानविकलदृष्टांतकं ४१

यथा यो यो धूमवान् सोऽग्निमान् यथा हृदः न — नायः पिंडो वाऽनुपदर्शितान्वयः हेतौ साध्यान्वयो यत्र न प्रदर्शितः यथा धूमादिमांस्तरं यथालोकवान् स
वह्निमानिति विपरीतोपदर्शितान्वयो हेतौ रूपान्तरेणोपदर्शितान्वयः यथा यो हृदादिरन्तिधर्मवान् स वह्निमानिति एवं व्यतिरेकोदाहरणाभासद्वयेपि द्रष्ट
व्यं ॥ ६५ ॥ ६६ ॥ पूर्वमुदाहरणोपनययोरवसरसंगतिः सूचिता संप्रति तूदाहरणार्थव्याप्त्यासहोपनयार्थव्याप्तिविशिष्टपक्षधर्मतायाएककार्यानुकूल
७२ त्वसंगतिरित्युदाहरणानंतरमेवसादिमवतुव्याप्तिरित्यनेनव्याप्तिरुदाहरणादवगतेति सूचितं व्याप्तमिति व्याप्तेः सहकारि किमित्याकांक्षायां व्याप्तिप
क्षधर्मगोचरामाकांक्षायामित्यर्थः तथा च उदाहरणात् व्याप्तौ ज्ञातायां तस्याः सहकारिणि स्मृते किमस्याः सहकारीति जिज्ञासयोपनयाभिधानात् अनंत
राभिधानप्रयोजकजिज्ञासाजनकत्वान्विषयो व्याप्तिसहकारित्वसंगतिरितिभावः मिश्राणामपि व्याप्तिपक्षधर्मतयोः सहकारित्वप्रदर्शनमेतत्स्मरणमि
ति तत्त्वैः सहमंत्रणीयं ॥ अनुमितिजनकेति पक्षतत्साध्यव्याप्यप्रकृतहेतुविशिष्टपक्षत्वपक्षावगाही च बोधो विवक्षितः निगमनेन तु पक्षवृत्तितया हेतु
र्बोध्यते नतु हेतुमत्तया पक्षः यादृशयादृशबोधजनकतयोपनयाः संप्रदायसिद्धाः तादृशविषयतावच्छिन्नविषयताशून्यबोधजनकन्यायावयवत्वं वि
वक्षितं ते न वह्निव्याप्यधूमवानित्यनेन धूमे व्याप्तिवैशिष्ट्यं प्रतीयते किंतु व्याप्तिमारात्म्यं पक्षे च न धूमवैशिष्ट्यं अपि तु धूमवदभेद इत्यसंभवः समाहितः समा
हिता च निगमनातिव्याप्तिः तृतीयेति अलाभात् अजननात् ननु मानजन्यतामवयवांतरेण व्याप्तिविशिष्टपक्षधर्मताज्ञानं तथामुदाहरणोपनीतव्याप्ति
विषयको मानस एव परामर्शो भविष्यतीत्यत आह तदनभ्युपगमेवेति अलाभादिति तथा चोपनयाभावे पक्षधर्मतोपनयाभावात्मानसोपि तथा परा

४२ 42 मर्शोद्भूत्वमइतिभावः ननु धूमवत्त्वादिति हेत्ववयवे मतुपा पक्षधर्मतो व्याप्तत्वलाभं कानिवेधति · नचेति अन्तर्भूतत्वात् पक्षे हेतुसंसंधावबोधकत्वात् अ
त एव धूमादिति प्रयोज्यं · ननु धूमवत्त्वादिति प्रागुक्तं वादिवाक्यादिति यदि वाक्योपस्थितात् हेतोः साध्यगमकत्वादित्यर्थः असिद्धत्वेनाप्रामाण्यज्ञाना
वलीढत्वेन · अन्यथा वादिवाक्यजन्यबोधे भ्रमत्वशंकाविरहे सर्वांशेष्वेकत्वात्तत्वे त्वत एव मानान्तरात् उपनयनिगमनयोः परैकवाक्यतया संगतिर्नापे
क्षते समयबंधादेव चयोर्वापर्यमित्याशयेन सिद्धं निर्दिशति उपनयानन्तरमितीति न्यायावयवत्वं · कारणान्तरस्यार्थः साध्यधीजनकत्वं · साध्यधीज्ञानज
कत्वं · व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानहेतुकत्वेन साध्यज्ञानावगाहिबोधजनको न्यायावयव इति समुदितार्थः पर्याप्तेरिति साध्यहेतुव्याप्तिपक्षधर्मता
नां परामर्शनीयानामुपनयादित्यर्थः अबाधितासत्प्रतिपक्षितत्वविषयको मानसो बोधः परार्थपरामर्श इत्युच्यते स एव परार्थानुमितेर्जनकः तथा चाबा
धितत्वादेर्व्यंजकं निगमनमपेक्ष्यत इत्याह अबाधितेति नन्वनुमितिकारणज्ञानविषयतया दृष्टचरी व्याप्तिः पक्षधर्मता चेति तद्विषयक एव परार्थः परा
र्शो गवेषणीयस्तदुभयं चावयवान्तरेणोपनीयत इति अर्थं निगमनमित्याशयेनाह अथेति अवयवान्तराणां निगमनातिरिक्तानामित्यर्थ इति मिश्रानुसा
रिणः वस्तुतस्तु योगतस्येयमाशंका अवयवान्तराणां · प्रतिज्ञाहेतुनिगमनानां · ननु पर्वतो वह्निमान्नवेति शंकानिवर्तकत्वेन · पक्षे साध्यवत्ताबोधिका
प्रतिज्ञा निगमनेन चापेक्ष्यते इत्यत आह अन्यथेति विपरीतेति तत एवोदाहरणोपनयजन्यवाक्यार्थबोधात्पामेव पक्षे तद्वत्ताबुद्धेरिव तस्या अप्युद्दे राम ४२
श्यपि विपरीतशंकानिवर्तकत्वादिति भावः अप्रामाण्यशंकातु निगमनादिजन्यवाक्यार्थबुद्धावपि तुल्येत्याह अन्यथेति ननु निगमनादिजन्यवाक्यार्थ

बुद्धेः प्रतिबंधकत्वाद्यामप्रामाण्यशंकानोत्तेजिकेत्यत आह नहीति· विशेषदर्शनं हि स्वरूपप्रतिबंधकतावच्छेदकरूपं· तथा च स्वमात्मरूपेणाल्पतं त्र प्रतिबं
धकतायां मानाभाव इति भावः अभिधीयतां वा प्रतिज्ञातत एव शंकानिवृत्तेर्निगमनं तु व्यर्थमिति भावार्थे शंकते सिद्धेति प्रतिज्ञासाध्यत्वेन वह्निं बो
धयत्यत एव तत्राप्रामाण्यशंका· निगमनं तु सिद्धत्वेनेति तस्मादप्रामाण्यशंकाग्रस्य निगमनजन्यबोधाद्विपरीतशंकानिवृत्तिरित्याशयः यद्वा प्रति
ज्ञानिगमनयोर्द्वयोरपि सार्थकत्वमाशंकते सिद्धेति सिद्धनिर्देशं विना न शंकानिवृत्तिरिति निगमनाभिधानं सिद्धनिर्देशश्च साध्यतया ज्ञातुं निर्देशापेक्षी
ति प्रतिज्ञाभिधानमिति भावः किमिदं सिद्धत्वं यन्निगमनेनाभिधीयते किं प्रमितत्वं तत्र अत एव तत्रनाप्रामाण्यशंकेति· किं वा ज्ञानानन्वयित्वेनाभिधा
नमेव सिद्धाभिधानं आद्ये स्वरूपेति· प्रमितत्वपरीहारेणान्वयादित्यर्थः अंत्ये साध्यत्वेति· साध्यतानुपस्थितौ ज्ञानविषयत्वाग्रहे अथ साध्यनिर्देशं विना
नावयवांतरावतार इति प्रतिज्ञासार्थक्यं पूर्वमुपपादितं· इदानीं तु अबाधितत्वादिरूपमनुमितिजनकज्ञानविषय इति तद्बोधकं निगमनमपेक्ष्यत इत्याह·
तथा प्रतीत्यादिना असिद्धनिर्णयासंभवाद्बाधितत्वादेर्ज्ञानसंशयसाधारणं ज्ञानं कारणमिति सर्वत्र निर्णये यन्न इति रित्याशयेनाह नेत्यादि प्रतिज्ञापेक्ष
या निगमनस्य वैलक्षण्यमाह न चानन्वय इत्यादिना सिद्धत्वेन· ज्ञानानन्वितत्वेन· साध्यज्ञापकत्वे निगमनेत्यस्मादित्यनन्वितमित्युक्तं तात्पर्यबोधपूर्वक
मित्यर्थः स्वतात्पर्यमाह तस्मादिति अवयवांतरानपेक्षयद्धेतुमत्तया साध्यं बोधयति तत्सिद्धत्वेन साध्यज्ञापकं· न च प्रतिज्ञा तथा किं तु निगमनमिति भा

४३ 43

वः हेतनांकांक्षत्वमवयवांतरोपात्तहेतनाकांक्षत्वं · हेतवयवानाकांक्षत्वं वा · तदेव सिद्धत्वं · सिद्धताभिधानेत्वं · ज्ञानत्वं · अवधारणात् · निगमनइति
शेषः अन्वयात्प्राक्प्रतिज्ञायाइतिशेषः तस्मात्तथेतिनिगमनाकारत्वादिनां मतमनुपपत्तिरिह केचिदिति प्रसिद्धस्थलइवेति दृष्टांतइत्यर्थः यथा दृष्टां
तेयथाशब्देन धूमविशिष्ट एव वन्हिरूपस्याप्यते · तथा निगमनेस्थतथाशब्देनाप्यन्यथाधूमविशेषिसाध्यसिद्धौ अर्थांतरप्रसंगादितिभावः स्वरूपे
धूमवन्हित्वावच्छिन्नेप्रकारे नैयायिकाभिमतसादृश्ये सादृश्ये मीमांसकाभिमतेसामान्येनेति तथापदोपात्तसादृश्यप्रतियोगितया उदाहरणवाका
र्थएवभासते सचपर्वतोपीति पर्वतभिन्नत्वेसतिपर्वतवृत्तिधर्मवत्वं पर्वतेऽनन्वितमित्यर्थः अतएवातिरिक्तसादृश्यस्याभेदनियतत्वादेव · ननुनोदा
हरणवाकार्थस्तथाशब्दोपात्तसादृश्यप्रतियोगी · किंतुदृष्टांतवाक्यार्थमात्रं · तथाचयथामहानसंतथापर्वतइति संबंधइत्यतआह अभेदानुमानेचेति अ
यंघटएतद्घटाभिन्नएतद्वृत्तिघटत्ववद्धर्मवत्वादित्यादौ केनाप्युदाहरणवाकार्थेनसहभेदः पक्षेनास्तीतिभावः नन्वभेदानुमानेव्यतिरेकेणोदाहरणात्तस्मात्
तथेति निगमनं च सूपपदमतआह · अन्वयिनीति गगनंप्रमेयं शब्दादित्यादावित्यर्थः अत्रव्यतिरेक्युदाहरणप्रयोगासंभवात् अन्वय्युदाहरणवाका
र्थसादृश्यस्यपक्षेऽसंभवात्तत्र तथेतिनिगमनानुपपत्तिरितिभावः अविज्ञातार्थेनामनिग्रहस्तथेतिप्रयोगेस्यादाह बहूनांचेति अथनिगमनेसिद्धानुवा
दतयाप्रतिसंहितेप्रयोजनजिज्ञासायामबाधितत्वादिप्रतिपत्तितात्पर्यकत्वमवसीयते · तदेवतात्पर्यंव्यंजनेति तत्सहकारादबाधितत्वादिगोचरोमा राम० ४३

नैरोधोध्वस्तेनवाक्ये न जन्यते । तन्नास्यर्थे स्वरूपव्यंजनाया एतावानेवोपयोगोपदीत इत्यौदिमानप्रतिबंधेनतन्निर्णयसंपादनं । तदुक्तं निबंधे । उपसंहा
रस्येवेषमहिमायद्विपरीतशंकानिवारणानामेति सिद्धांतवादत्वेपुनरुक्तत्वं । शास्त्रतोऽर्थ तथैकोस्त्वेव संभवति । तथोक्तमुपसंहारेचनप्राचेकामिस्तो
ऽबाधितत्वंव्यंजकत्वमुपपन्नं स्यादित्याशयेनाह । तस्मादनित्यइति सिद्धांतसिद्धांतवादत्वं निगमनस्येतिशेषः पूर्वप्रतिज्ञयासाध्यतयाऽवयवांतरोपात्त
हेतुसाकांक्षतया । अन्यथाप्रयोजनांतराभावेनिगमनेऽबाधितत्वादिप्रतिपत्तिप्रयोजकत्वमवसीयतइतिशेषः ॥ ॥ जरन्नैयायिकानिरस्यति । संशये
त्यादिन्यायस्यावयवानां च लक्षणं प्राक्निर्दिष्टमिदानींप्रतिज्ञादीनां लक्षणान्याह । दीधितावितरेत्यादि उदाहरणावारणायप्रथमं सत्यंतं स्वाघटक
पदसाकांक्षपदघटितत्वं तदर्थः उपनयादिवारणायस्वकीयमित्यादि । स्वीयमितिपाठः प्रामादिकः स्वपदादेः प्रत्ययेनित्यसंबद्धप्रत्ययानुशासनात् स्व
घटकपदप्रागवर्त्ति स्वघटकपदार्थमुख्यविशेष्यकबोधजनकत्वं द्वितीयसत्यंतार्थः उपनयस्यापि निगमनघटकपदप्रागवर्त्तिपदार्थमुख्यविशेष्यक
बोधजनकत्वात् प्रथमपदं विशेषणं स्वघटकेति निगमनस्यापि स्वप्रागवर्त्ति उपनयस्थेदंपदार्थमुख्यविशेष्यकबोधजनकत्वादंत्यपदं विशेषणं
। स्वघटकेतिइदंद्वयं गुणान्यत्वेसति सत्त्वादित्यादिहेत्ववयवस्यान्यत्वविशेष्यकबोधजनकस्य वारणाय विशेष्यतायां मुख्येति अस्यद्वितीयसत्यंतस्यानु
योगिनिस्वपदार्थप्रवेशादननुगमात् प्रतियोगिनि स्वपदनिवेशादनुगतकल्पचैकल्पिकं पक्षांतरमाह अंते त्वादि सतिचेत्यंतेन । अन्येतरेत्यादिसत्यं
तं पूर्ववदुदाहरणवारणाय धूमादित्तिहेत्ववयववारणायांसवत्वेसतीतिपदद्वयघटितत्वे सतीत्यर्थः इतरार्थान्वितस्वार्थबोधकपदद्वयघटितन्याया

वयवत्वं निगमनेऽतिव्याप्तमतः स्वकीयत्वादि अत्रापि स्वघटकपदप्रागवृत्तिस्वघटकपदार्थमुख्यविशेष्यकान्वयबोधाजनकं यद्यत्तद्भिन्नत्वमर्थः
उपनयस्थायंपदस्य निगमनप्रागवृत्तित्वात्तद्वारणाय प्रथमं स्वघटकेति निगमनघटकपदप्रागवृत्तिउपनयस्थायंपदार्थमुख्यविशेष्यकान्वयबो
धजनक निगमनेऽतिव्याप्तिवारणाय द्वितीयपदविशेषणं स्वघटकेति· जन्यत्वे सति सत्त्वादित्तिहेत्ववयववारणाय विशेष्यतापर्यं मुख्येति प्रतिज्ञाहे
त्वोरित्यादिना द्वितीयसंसर्गत्याववर्तनीयाहेत्ववयवादयइति सूचितं· ननूदाहरणस्येतस्येनेनप्रथमसंसर्गत्या वर्जनीयमुदाहरणमभिप्रेतं· पदमिति
तथा च स्वघटकविभक्त्यंतपूर्ववृत्तिस्वघटकविभक्त्यंतार्थविशेष्यकान्वयबोधजनकत्वादिति द्वितीयसंसर्गतार्थस्तस्मान्नेतराणीत्यादि निगमनवारणाय प्र
थमविभक्त्यंतेति साध्यैकदेशप्रतिपादकत्वं तदर्थः तस्मादई पिप्पलीत्यादेपिप्पल्यहादिसाध्यके स्वघटकविभक्त्यंतपिप्पल्यादिपदपूर्ववृत्तिपदा
र्थाद्यादि विशेष्यकान्वयबोधजनकनिगमनवारणाय द्वितीयविभक्त्यंतेति तदाह तेन निगमनव्युदास इति परे तु तस्मान्नेतराणीति निगमनवार
णाय स्वघटकपदप्रागवृत्ति पदमव्ययभिन्नत्वेन विवक्षणीयं· अथवा निपातातिविभक्त्यंताएवनभवन्तीत्याहुः स्वधर्मेणोक्तमपित्यादेः प्रतिज्ञायामव्याप्तिप्र
संगात्· तस्मादन्यइतरेभ्यइत्यत्र निगमनेतथाप्यव्याप्तिनादवस्थात् नप्रतिज्ञार्थे प्रतिज्ञार्थमुख्यविशेष्यः ननु प्रथमहेत्ववयवलक्षणं उपनयेऽति
व्याप्तं तस्यापि पक्षान्वितस्वार्थबोधकत्वं यन्निगमनं च रूपदं तदर्थविशेष्यतयान्वितस्वार्थवाक्यार्थकत्वान्नत्वन्वयोर्विशेषणात्तयैवविवक्षितः प्रमेय रा.म.
त्वमभिधेयं प्रमेयत्वादित्यत्र प्रतिज्ञावारणाय स्वार्थपदमिति त्वयैवसूचितत्वात् विशेषणात्तयान्वयस्य विवक्षितत्वे तु प्रतिज्ञैकदेशार्थस्यापि विशेष्य ४४

45

तथैवान्वयेन तत्राप्ति आह्स्यपोगात् तत्रस्य निगमनेन तथाव्याप्तिव्याप्तेश्च हेतु हृत्तत्प्रहृतपक्षान्वितेदं पदार्थविशेषणं तथैव निगमनवाक्यार्थस्यान्वयाद
तो लक्षणांतरमाह स्वार्थविशिष्टेति पदार्थविशिष्टवैशिष्ट्यबोधोन्मायजन्यो न्यायघटकपदाजन्यो वा तन्न्यायावयवो हेतुरित्यर्थः तेनोदासीनवाक्यसहकारेण
निगमनादेरपितादृशबोधजनकत्वेपि नक्षतिः द्वितीयतृतीयलक्षणयोरपि विशिष्टवैशिष्ट्यबोधोन्मायजन्य एव विवक्षितः॥ विशेषणमिति अन्वयव्याति
रेकमुदाहरणं नास्त्येवान एवनैकदोभयव्याप्त्यापीत्युक्तं पूर्वमतो न तत्र द्वयोर्लक्षणयोरतिव्याप्तिस्तल्लक्षणप्रदर्शने न न्यूनतावेत्याभिमानः इतरेत्यादि इतरो
पस्थापितार्थविशेषणतानिरूपितस्वार्थमुख्यविशेष्यताकबोधकत्वमर्थः॥ ॥तत्रैव विशेष्यविशेषणाभावव्यत्यासेन द्वितीयं लक्षणं स्वार्थत्वं स्वप्रति
पाद्यत्वं मुख्यविशेष्यतानिवेशान्नप्रतिज्ञायामतिव्याप्तिः निगमनलक्षणेऽवयवार्थोऽवयववाक्यार्थः स्वार्थः स्वजन्यप्रतीतौ मुख्यविशेष्यः हेत्ववयवेतिव्याप्तिं
निरस्यति हेत्वर्थस्येति॥ ॥न्यायावयवमणौ यो दीधितिदोषेणादर्शितो दोषः तस्योद्धरणोन्मपि — येतथा कृतेतरः पुरुषः॥ ॥इत्यवयवदीधितिविद्योतः॥

४५

व्यय प्रद्योत विधि

१९४.

पम०
४५